No. १२५० घ

Title न्यायसिद्धान्तमञ्जरीदीपिकाटीका प्रत्यक्षखण्डः

Author श्रीकण्ठदीक्षितः

Extent १७ पत्राणि Age

Subject न्यायवैशेषिकम्

समवायरूपचाक्षुषप्रत्यक्षसामग्रीतः। साक्षात्कारोत्पत्तेः। चाक्षुषप्रत्यक्षोत्पत्तौ। नन्वेतावता साक्षात्कारोत्पत्तावपि न निर्विकल्पकसिद्धि
रित्यत आह। तदेवेति। घटत्वज्ञानशून्यकाले जायमानं प्रत्यक्षमेवेत्यर्थः। अस्माकं नैयायिकानां। निर्विकल्पकमिति। तथा च घटत्व
ज्ञानाभावाज्जायमानं निष्प्रकारकमेव भविष्यतीति सिद्धं निर्विकल्पकात्मकज्ञानेन [illegible]ति भावः। ननु रक्तो दंडो न वेति संशये
रक्तत्वविशिष्टदंडवैशिष्ट्यावगाहिज्ञानानुदयात् विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्ण
यत्वेन हेतुताया आवश्यकत्वात्तत एव दंडज्ञानशून्यकाले दंडविशिष्टपुरुषज्ञानानुपपत्तेर्निर्वाहे अलं विशिष्टबुद्धिं प्रति विशे
षणज्ञानस्य हेतुतया। न च विशिष्टस्य वैशिष्ट्यमिति न्यायेन विषयताशालिबुद्धिं प्रत्येव विशेषणतावच्छेदकप्रकारकनिर्ण
यस्य हेतुत्वेन दंडज्ञानशून्यकाले विशेष्ये विशेषणं तत्रापि विशेषणं * तदंशमिति न्यायेन दंडविशिष्टज्ञानापत्तिवारणाय तद्धे
तुत्वमावश्यकमिति वाच्यं। तथापि तद्धेतोरेवेति न्यायेन विशेषणविशेष्येंद्रियसंनिकर्षादेव विशिष्टप्रत्यक्षोपपत्तेः। अनु
मित्यादौ तु परामर्श एव नियामक इत्याशयेनाह एकतमीमांसकः। नन्विति। हेतुतासिद्धौ विशिष्टज्ञानं प्रति हेतुतासिद्धौ सर्वत्र त
न्निर्विकल्पकादिसाधनमेवं स्यात्। सर्वो [illegible] न्यायेन समुक्तिकं स्यात्। तत्रैवेति। विशेषणज्ञानस्य विशिष्टज्ञाने हेतुत्व एव
वेत्यर्थः। मानमिति। विशेषणविशेष्येंद्रियसंनिकर्षादेव तदुपपत्तेस्तत्र प्रमाणाभाव इत्यर्थः। प्रमाणाभावप्रमेयाव्याप्यत्वादिति

न॰प्र॰ २६

नावः। अन्वयव्यतिरेकाभ्यामिति। विशेषणज्ञानसत्वे विशिष्टज्ञानं विशेषणज्ञानाभावे विशिष्टज्ञानाभाव इत्येवंरूपान्वयव्यतिरेका
भ्यामित्यर्थः। तदवधारणन्तु। विशेषणज्ञानस्य विशिष्टबुद्धिं प्रति हेतुत्वावधारणन्तु। यथान्वयव्यतिरेकाभ्यां दंडे कारणत्वग्रहस्तथा
प्रकृतेपीति भावः। ननु न केवलावन्वयव्यतिरेकौ कारणताग्राहकौ अतिप्रसंगात्। अपि त्वनन्यथासिद्धान्वयव्यतिरेकावेव। प्रकृ
ते च विशेषणविशेष्येन्द्रियसन्निकर्षेण विशेषणज्ञानस्यान्यथासिद्धत्वान्न तथाविधयोस्तयोः संभव इत्यत आह। चिरतरस्थिति
अनुसंधेय इति। कदाचिद्घट इति स्वरूपतो घटत्वप्रकारकज्ञानसत्वे कदाचिज्जातिमानिति जातित्वरूपेण घटत्वप्रकारकज्ञा
नस्योत्पत्तिरिति नियमनिर्वाहाय स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो घटत्वज्ञानेनैव घटत्वविशिष्टबुद्धिं प्रति च जाति= जातित्वेन
त्वेन घटत्वज्ञानस्य हेतुताया आवश्यकतया विशेषणज्ञानस्य हेतुतासिद्धिः। अथ घटत्वज्ञानसत्वेपि कदाचिदयं घट इत्याकार
कघटत्वप्रकारकज्ञानस्य कदाचिज्जातिमानित्याकारकघटत्वविशेष्यकज्ञानस्योत्पत्त्या नान्निर्वाहतायानापत्या तद्ज्ञानेऽदृष्ट
विशेषस्यैव नियामकत्वमावश्यकं तथा च प्रकृतेप्यदृष्टविशेषेणैव तथाविधकादाचित्कज्ञानद्वयोपपत्तेरलं विशेषणज्ञान
हेतुतयेति चेन्न। एवं गत्यंतराभावे नादृष्टस्य नियामकत्वकल्पने पि प्रकृते दर्शितरीत्या गतिसंभवेऽदृष्टविशेषस्य नियाम
कत्वकल्पनाया अन्याय्यत्वात्। एकत्रादृष्टं नियामककल्पनादन्यत्रापि तस्यैव नियामकत्वकल्पने कार्यकारणभावमा

स्य

शि॰व॰ २६

ऽवच्छेदापत्तेरिति। न नु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वं नाम घटत्वांशेऽप्रका
[redacted] रकबुद्धित्वं तत्र च जातित्वादिभासकसामग्रीसत्वे जायमानं ज्ञानं घटत्वांशेऽप्रकारकमेवोत्पद्य
ते तदंशे जातित्वादिभासकसामग्र्यभावे च घटत्वांशेऽप्रकारकमेव जायत इति तादृशधर्मस्य नीलेतरघटत्वादिवद्दार्पसमाज
ग्रसत्वेन अनुगतानवच्छेदकत्वात् कथं तादृशज्ञानं प्रति स्वरूपतो घटत्वज्ञानस्य हेतुत्वं कल्प्यमपि तादृशविशेषणज्ञानहेतुत्वासिद्धि
रिति चेन्न। जातित्वभासकसामग्रीसत्वेपि जातिमान्य इति स्वरूपतो घटत्वविशिष्टबुद्धित्व विशिष्टबुद्धि
पाद्घटत्वांशे निरवच्छिन्नप्रकारताशालिज्ञानत्वमेव [redacted] स्वरूपतो घटत्वविशिष्टबुद्धित्वं तदवच्छिन्नं प्रति च स्व
रूपतो घटत्वज्ञानस्य हेतुत्वस्य कल्पनं विना आपत्तिवारणासंभवात्। न नु निरुक्तव्यावर्त्तनाय जन्यं विशिष्टज्ञानत्वमेव
विशेषणज्ञान कार्यतावच्छेदकं वाच्यं। तत्र च जन्यत्वं ध्वंसप्रतियोगित्वं वा प्रागभावप्रतियोगित्वं वा कालिक
संबंधेन घटत्वादिमत्वं वेत्यत्र विनिगमनाविरह इति चेन्न। विशिष्टधर्मस्यापि कार्यतावच्छेदकत्वे क्षतिविरहात्। अथैवं कारणतानुपपत्तिः। कारणत्वं हि कार्या
व्यवहितपूर्वक्षणावच्छेदेन कार्या[illegible]धिकरणदेशनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्वं। तच्च घटाधिकरणे यत्किंचिद्घटाव्यवहितपूर्वक्षणावच्छेदेन द
ण्डाभावसत्वात् कारणत्वानुपपन्नमिति तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्वं वाच्यं। तेषां सति घटत्वाव
च्छिन्नं प्रति रासभत्वेनापि कारणत्वप्रसंगः। यत्किंचिद्घटाव्यवहितपूर्वक्षणावच्छेदेन कपाले रासभसत्वात्। तथा च कार्यतावच्छेदकावच्छिन्नयावद्व्यक्तीस्तत्प्राक्कालेन

कपाले

वृत्ति स्वर्वत्वे

न०प्र०

३७ ध्वंसानन्तकार्यासमवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणे तत्सत्त्वाभावे स्वेव वाच्यं। एवं च निःशेषधर्मस्य कार्यतावच्छेदकत्वे कार्यतावच्छेदकावच्छिन्नयावन्मध्ये नि
त्यप्रत्यक्षेऽपि अविशिष्टत्वेन तदव्यवहितपूर्वक्षणाप्रसिद्धेरिति चेन्न। कार्यकारणभेदेन कारणताया भिन्नतया प्रकृते नित्यप्रत्यक्षातिरिक्तप्रत्यक्षाणामेव तत्त्वात् किं नोपादाना
साधारणरूपेण कार्यत्वेऽपि कारणत्वे बाधकाभावात्। एवं समवायकालिकविशेषणतोभयसंबंधेन विशिष्टज्ञानस्य कार्यतावच्छेदकत्वेनानि
त्यसाधारण्याभावाच्च। वस्तुतस्तु विशिष्टविषयकत्वज्ञानत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण जन्यप्रत्यक्षमात्रवृत्तिवैजात्यस्वीकृ
संकरभ त्य विजातीयविशिष्टज्ञानत्वस्यैव तत्कार्यतावच्छेदकत्वात्। चाक्षुषत्वादिना सांकर्यभियाश्च निर्विकल्पकैतद्वैजात्यस्वीकारः। अत एव जन्यधीजन्यमात्रवृत्तिता पि ५
याचें ५ दृशवैजात्यस्य जन्यत्वाभावाज्जन्यसाक्षात्कारे प्रागुक्तसाक्षात्कारत्वलक्षणस्याव्याप्तिरिति परास्तं। तस्य निर्विकल्पकसाधारणत्वेन जन्यधीजन्यमात्रवृत्तित्वाभावा
ज्ज्ञानसाक्षात्त्वाभावाच्च न दृष्टस्यानुमानसाधारणत्वे नञ्ज्ञानो विशेषणोपलब्धादि सूक्तत्वादिति दिक्। निर्विकल्पकं निरूप्य क्रमप्राप्तं सविकल्पकं निरूपयति। वै
शिष्ट्यावगाहीति। संबंधविषयकमित्यर्थः। ननु इन्द्रियसंबद्धविशेषणतारूपकारणबलान्निर्विकल्पकेऽपि संबंधभाने बाधकाभावात्तस्यापि वैशिष्ट्यावगाहित्वम
तोऽव्याप्तिरित्यत आह। सप्रकारकं चेति। किंचिन्निष्ठप्रकारताशालीत्यर्थः। निर्विकल्पके च प्रकारतया घटत्वादेरभानान्न तत्राव्याप्तिरिति भावः। व दे ५
स्तुतस्तु वैशिष्ट्यावगाहित्वस्य संसर्गमर्यादया वैशिष्ट्यावगाहीत्यर्थः। किंचिन्निष्ठसांसर्गिकविषयताशालित्वमिति पर्यवसितोऽर्थः। ननु किंचिन्निष्ठप्रकार
ताशालित्वमित्यपि वक्तुं शक्यत एवेति तत्कुतो नोक्तमित्यत इष्टापत्त्या तथैवाह। सप्रकारकमिति। इत्युपलक्षणं। किंचिन्निष्ठविशेष्यताशालित्वमपि तत्
मित्यपि बोध्यं। ननु सप्रकारकत्वमित्यत्र प्रकारत्वनिर्वचनात् किं तत्प्रकारत्वमित्यत आह निरूपयति प्रकारता चेति। ज्ञाने इति निरूपितत्वं सप्तम्यर्थः। घट
त्वादेरिति निष्ठत्वं षष्ठ्यर्थः। ज्ञाननिरूपितो घटत्वनिष्ठो विषयताविशेष इत्यर्थः। विषयताविशेष इति। विशेष्यताख्या विषयतो प्रकारताख्या। विषय शिवः

३७

तासां सर्गेद्ध विषयतारूपत्रिविधविषयताभेद इत्यर्थः। ननु किं तद्विषयतात्वमत आह। विषयतया चेति। विषये ति। घटो ज्ञानविषयः पटो ज्ञानविषय इत्यनुगम
प्रतीतिसाक्षिक इत्यर्थः। स्वरूपसंबंधविशेष इति। ज्ञानविषयरूपः स्वरूपसंबंध इत्यर्थः। ननु विषयतायाः स्वरूपसंबंधांगीकर्तृप्राचीनमते तस्यां ज्ञा
नस्वरूपत्वं विषयस्वरूपत्वं वा। न तावदाद्यः। ज्ञानरूपत्वे घटभूतलद्वित्विषयतयोरैक्येन घटवद्भूतलमिति ज्ञानोत्तरं घटत्वनिष्ठप्रकारतानि
२५ रूपितभूतलनिष्ठविशेष्यताशालिज्ञानवानहमित्याद्यनुव्यवसायवद्भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताशालिज्ञानवानहमि
त्यनुव्यवसायापत्तेः। एवं घटपटाविति समूहालंबनज्ञानस्य भ्रमत्वापत्तेश्च। तज्ज्ञानस्यैकेन तत्स्वरूपघटपटादिविषयताभ्यामभेदेन घटत्वा
भाववन्निष्ठविशेष्यतानिरूपितघटत्वनिष्ठप्रकारताशालिज्ञानत्वरूपभ्रमस्य तत्र सत्वात्। न द्वितीयः। घटभूतलसंयोगा घटवद्भूतलमिति
समूहालंबनविशिष्टबुद्ध्योः विषयाणामैक्येन विषयकृतवैलक्षण्याभावाद्विषयताकृतमेव वैलक्षण्यं वाच्यं। तत्र च विषयतायाः विषयस्वरू
पत्वेन तत्स्वरूपाणां तासामपि वैलक्षण्याभावात्समूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिर्जागरूकैव। न च समूहालंबनाविषयस्य घ
२ टप्रतियोगिकत्वभूतलानुयोगिकत्वरूपसंबंधस्यापि विशिष्टबुद्धिविषयत्वात् न वैलक्षण्यानुपपत्तिरिति वाच्यं। घटभूतलसंयोगप्रति
योगिकत्वानुयोगित्वानीति संबंधस्यैव घविषयकस्यापि समूहालंबनस्य संभवात्। न च समूहालंबने संयोगत्वेन संयोगभाना
भानानुपपत्तिरिति वाच्यं। घटवद्भूतले संयोगश्चेति विशिष्टज्ञानस्य तादृशसमूहालंबनाद्वैलक्षण्यानुपपत्तेरिति स्यात्। स्वरूपसंबंधरूपत्वं
दुर्वचमित्यत आह। पदार्थान्तरमिति। तथा चातिरिक्ताया विषयताया विषयभेदेन भिन्नतया न एवंविधानुपपत्तिरिति भावः। केचित्तु स्वरूपसं

बंधरूपाया विषयताया अननुगमेनानुगतप्रत्ययानुपपत्तिरत आह पदार्थांतरमिति तीयाकृत्त्वदसत्। तस्या अतिरिक्तत्वे पि तन्माद्विषयभेदेन भिन्न
तया अनुगतप्रत्ययानुपपत्तितादवस्थ्यात्। न चानुगतप्रत्ययानुपपत्तिः कथं वारणीयेति वाच्यं। विषयतात्वमेकमंगीकृत्य तस्य वेदि। अतए
व घटत्वविशिष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन हेतुतायां विषयताया प्रकारताविशेष्यतादिभेदेन भिन्नतया एकस्या विवे शे
न्यविधविषयताशालिज्ञानाद्विशिष्टबुध्यनुत्पत्यापत्तिरपि निरस्ता। तत्र विषयतात्वेन प्रकारताविशेष्यतयोरनुगमेनानुपपत्यभावादित्यास्तां
विस्तरः। घटं जानातीत्यादौ ज्ञानजन्यं घटनिष्ठं ज्ञाततारूपपदार्थांतरमंगीकार्यं। अन्यथा घटस्य कर्मत्वानुपपत्तेः। क्रियाजन्यफलशालित्व
स्यैव कर्मत्वरूपत्वात्। न च चज्ञानं निमित्तकारणं समवायिकारणं च घटः। तदेव च विषयतेति निष्कृष्टं भट्टमतमादर्शयति। भट्टास्त्विति।
ज्ञानजन्यः। निमित्तकारणविधया ज्ञानजन्यः। ते विषयनिष्ठ इति। समवायेन विषयवृत्तिरित्यर्थः। संबंधस्वरूपेति। अतिरिक्तसंबंधस्वरू
पेत्यर्थः। युक्तं सयुक्तिकं। एतत्। ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदार्थांगीकरणं। अन्यथेति। ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदा
र्थांतरानंगीकरणे। ज्ञानकर्मत्वमिति। घटं जानातीत्यादौ घटादेः क्रियाजन्यफलशालित्वरूपंकर्मत्वमित्यर्थः। क्रियेति। ज्ञानरूपधात्वर्थजन्यफ
लत्वाभावादित्यर्थः। विनष्ट इति। घटस्य नष्टत्वेन तत्र ज्ञानजन्यज्ञाततायाः असंभवादिति भावः। तदेवोपपादयति। न हीति। तत्र। वि म
नष्टघटे। तस्यैव। घटस्यैव। असत्वात्। नष्टत्वात्। ननु यथा मन्मते नष्टे घटे पि विषयतासंबंधेन ज्ञानमुत्पाद्यते तथा ज्ञाते नापि
तत्र तदुत्पादने बाधकाभाव इत्यत आह। न चेति। समवायिकारणस्य कार्यसहभावेन हेतुत्वात् घटनाशेन तदनुत्पत्तिसंभवः।

अन्यथा समवायिकारणनाशस्य समये तन्नाशे हेतुत्वात् ज्ञानतोत्पत्तिद्वितीयक्षण एव तस्या नाशापत्त्या प्रतिकूलत्वप्रसंगाद् इति भावः। ननु तत्र विषय-
तायाः ज्ञाततारूपत्वाभावेऽपि स्वरूपसंबंधरूपत्वमेवास्त्वित्याशंकते। नन्वेत्यादिना। तत्र नष्टघटस्थले प्रतीतेः। ज्ञातो घट इति प्रतीतेः। अन्यत्रापीति
विद्यमानघटस्थलेऽपि तिष्ठतु स एवास्त्विति। स्वरूपसंबंधविषयोऽस्त्वित्यर्थः। अधिकेनेति। स्वरूपसंबंधातिरिक्तज्ञाततारूपविषयत्वस्वीकारेणेत्यर्थः।
ननु सर्वत्र स्वरूपसंबंधस्य विषयत्वरूपत्वे तस्य ज्ञानजन्यत्वाभावात् घटस्य क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेन कर्मणि द्वितीयेति सूत्रेणाघ-
टं जानातीत्यादौ घटपदोत्तरं द्वितीया विभक्त्यनुपपत्तिरित्यत आह। कर्मविभक्तेरपीति। द्वितीयाविभक्तेरपीत्यर्थः। नष्टदेव। नष्टघटस्थले एव।
तथा च तत्रापि नष्टघटस्थले घटपदोत्तरं द्वितीयोपपत्त्यर्थं गौणमुख्यसाधारणकर्मत्वविशिष्टपरत्वं कर्मणि द्वितीयेति सूत्रस्य कर्मपदस्या-
वश्यमंगीकर्तव्यं मम अपि च तेनैव विद्यमानघटस्थलेऽपि द्वितीयोपपत्तिरिति भावः। एवं च क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावे-
ऽपि सविषयवाचकधातुसमभिव्याहारस्थले विषयत्वरूपं गौणमेव कर्मत्वमिति नानुपपत्तिरिति हृदयं। ननु त्वन्मते भावो ज्ञात इति प्र-
तीतेरभावेऽपि ज्ञाततायाः अवश्यमंगीकार्[illegible]। समवायिकारणं विना भावकार्योत्पत्त्यसंभव इति न नियमस्तथा च नष्टघटस्थलेऽपि नानुपपत्तिरित्यत आह। सं-
श्लेष इति। समवायातिरिक्तस्यैतरंगीकाद्विलक्षणस्वरूपसंबंधेन स्वाश्रयत्वमेव स्वसमवायिकारणत्वं। एवं च विलक्षणसंबंधेन स्वाश्रयं विना स्वस्या-
नुत्पत्तिरित्येव नियमः। अभावस्थले च विलक्षणसंबंधेन स्वाश्रयत्वमभावस्यांगीक्रियते इति विलक्षणसंबंधेन स्वाश्रयघटस्यासत्त्वाच्च नष्टघटस्य-
नुपपत्तिरंगीकर्तव्येति भावः। स्वमतावष्टंभेनेदं दूषणमिति केचित्। वस्तुतस्तु गौणकर्मत्वेनाप्युपपत्तौ इतिरिक्तज्ञाततायां प्रमाणाभावात् तद्-
एतत्त्वं विषयताया इत्येव दूषणं तत्रं सारं। प्रकारतो न विषयताविशेषः किंतु भासमानवैशिष्ट्यप्रतियोगित्वमेवेत्यंगीकर्तव्यं केषांचिन्मतमा

ह। अन्ये त्वित्यादिना। भासमानं यद्वैशिष्ट्यं संबंधस्तत्प्रतियोगित्वमित्यर्थः। पुरुष इति ज्ञानेऽपि दंडस्याप्रकारतापत्तिः। संयोगप्रतियोगित्वस्य दंडे सत्त्वा
त्तो भासमाने ति। तज्ज्ञाने च दंडप्रतियोगिकसंयोगाभानान्नातिव्याप्तिः। प्रतियोगित्वं च स्वरूपसंबंधविशेष एव। इदमेव संगमयति। अयमिति।
घटत्वस्य वैशिष्ट्यं घटत्वनिरूपितः समवायः। संयोगो हीति। वस्तुगत्या भासमानोऽयः संयोगस्तत्प्रतियोगित्वस्य दंडे सत्त्वात्प्रकारत्वापत्तिरित्य
र्थः। ननु तत्प्रतियोगिकत्वेन भासमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वमित्यर्थः। समूहालंबने विशिष्टबुद्ध्यभेदानुपपत्त्या विशिष्टज्ञाने प्रतियोगित्वा
नुयोगित्वान्यतरसंबंधसंबंधोऽपि भासत इत्युपेयते समूहालंबने च दंडप्रतियोगिकत्वेन संयोगस्याभानान्नातिव्याप्तिरित्यत आह। दिति
ति। तथापि दंडपुरुषदंडप्रतियोगिकदंडसंयोगा इति समूहालंबनेऽतिव्याप्तिः। न चात्र दंडप्रतियोगिकत्वस्य संबंधविषयतानानुभूति निवार्यं। तथा
सति संसर्गिकविषयताया अतिरिक्तत्वाभ्युपगमो किमपराद्धं स्वप्रकारतया संबंधसंबंधस्य विशिष्टज्ञानविषयत्वे गौरवं च विषयकृतवैलक्षण्याभावे
पि विषयताकृतवैलक्षण्येनैव ज्ञानानां वैलक्षण्योपपत्तेरित्याशयः। तज्ज्ञे ति। साक्षात्काररूपप्रमाकरणं चेत्यर्थः। तृतीयानुव्यवसायरूपप्रमाक
रणत्वस्य प्रथमानुव्यवसाये सत्त्वात् तज्ज्ञानोपादानेऽपि स्मृत्यादिप्रमाकरणत्वस्य निर्विकल्पके सत्त्वात् सविकल्पकादिरूपप्रमाकरणत्वस्य चक्षु
रादिसंयोगे सत्त्वात्तस्य बहुविधत्वमिति मतनिराकरणायाह। इंद्रियात्मकमिति। चक्षुरादिकमेव प्रत्यक्षं प्रमाणं अन्ये त्वनुव्यापारत्वमिति भा
वः। वस्तुतस्तु प्रत्यक्षप्रमाभ्रमनिराकरणायाह इंद्रियेति। द्रव्यग्राहकत्वं द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मवत्त्वं। तेनोपनी
तभानमादाय न रसनेंद्रियादावतिप्रसंगः। अनुपधायके दंडे चक्षुःसंयुक्तायजनकतावच्छेदकधर्मवत्त्वनिवेशः। तद्ग्राहकं च। द्रव्यग्राह ।शिवः।
कं चेत्यर्थः। द्रव्यग्राहकत्वं द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मशून्यत्वं तेनानुपधायके दंडे चक्षुषि नातिप्रसंगः। नचा

पिचक्षुस्संयोगसत्त्वादिति। अन्यत इत्यग्राहकेन्द्रियात्। अन्धस्य घटसन्निकर्षे स्पार्शनं जायत एवेत्यतो विप्रकृष्टेति। विहरवर्त्तीत्यर्थः। नतु मनः। आत्म
मात्रग्राहकमिति। तथा च मनस आत्ममात्रग्राहकत्वान्न तेन घटादिग्रहापत्तिरिति भावः। सर्वेति। मनः सर्वविषयकज्ञानजनकमिति सिद्धान्तभंगप
संगादित्यर्थः। सर्वविषयकमपि। सर्वविषयकज्ञानजनकमपि। तथा च न ताहृशसिद्धान्तभंग इति भावः। परतन्त्रमिति। स्वेतरबाह्यविषयकज्ञान
जनकसामग्रीसापेक्षमित्यर्थः। तथा चांधस्य विप्रकृष्टघटादीनां मनसा न ग्रहापत्तिः। तत्सहकारिचक्षुरादेरभावादिति भावः। किं तत्परमत
आह परमिति। मीमांसकैर्ज्ञानलक्षणसामान्यलक्षणयोगजधर्मानामस्वीकारे मनसश्चक्षुरादीन्द्रियमात्रसहकारित्वमेवोपेयते। अतए
वात्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमादिति संगच्छते इति तन्मतं निराकर्तुमाह। न
ज्ञानमिति। चक्षुरादिमात्रमिति। चक्षुरादिकमेव परं न पुनरित्यन्वयः। मात्रपदेन ज्ञानलक्षणादिव्यवच्छेदः। तथा च चक्षुरादिव्यापारं विनापि ज्ञानलक्षणा
दिसहकारेण कदाचिन्मनसा ज्ञानजननात्तेषामपि सहकारित्वमावश्यकं। उपदर्शितनियमस्तु लौकिकप्रत्यक्षस्य एवेति भावः। ननु ज्ञानल
क्षणासहकारेण मनसा ज्ञानजनने प्रमाणाभाव इत्यत आह। स्मृतेति। संसर्गेति। परस्परसंबंधग्रहादित्यर्थः। ननु परस्परसंबंधाग्रहे का क्षतिरत आह।
कथमन्यथेति। अन्यथा ज्ञानलक्षणासहकारेण मनसा स्मृतपदार्थानां परस्परसंसर्गाग्रहे इत्यर्थः। कविकाव्यादीति। कविना स्मृतिविषयीकृ
तपदार्थानां परस्परसंसर्गाग्रहे काव्यं विरच्येत नान्यथा वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात्। तथा च तदस्वीकारे संसर्गग्रहाभावेन काव्यरचनोच्छे
दप्रसंग इति तत्स्वीकार आवश्यक इति भावः। इदमुपलक्षणं। लौकिकसन्निकर्षं विनापि घटो नास्तीत्यादावभावांशे घटस्य भानात्। एवं सौरभे लौ
किकसन्निकर्षं विनापि सुरभि चंदनमिति चाक्षुषोदयाच्च तत्स्वीकारस्यावश्यकत्वमिति ध्येयं। लौकिकान्यतद्विषयताशालिप्रत्यक्षत्वावच्छिन्नं प्रति

त.अ.

३०

किंचिद्विषयतावच्छिन्नताविशिष्टविषयताशालिज्ञानत्वेन हेतुतेति कार्यकारणभावो बोध्यः। कार्यतावच्छेदके लौकिकत्व(न्य)निवेशात्माप्यमिकृविशिष्टबुद्धौ लौकि
कसन्निकर्षजन्यायां निर्विकल्पके च न व्यभिचारः। कारणतावच्छेदके किंचिद्विषयतावच्छिन्नत्वनिवेशाच्च न निर्विकल्पकोत्तरमनुपनीतभानापत्तिः। निर्वि
कल्पकेऽत्सुपनाय्यकृतांगीकारे तु तद्विषयताशालिज्ञानत्वेन हेतुतेति बोध्यं। सामान्यलक्षणाजन्यज्ञाने व्यभिचारवारणं तु अव्यवहितोत्तर
त्वसंबंधेन कारणत्वे विशेष्यनिवेशे वा तद्व्यक्तिधर्मप्रकारकज्ञानाजन्यत्वनिवेशात्तद्व्यक्तिघटत्वादिद्रव्यत्वादिरूपनानाधर्मप्रकारकज्ञाननिरूपितज
न्यतानामननुगमकत्वाभावादिति। इत्थं च कार्यतावच्छेदके लौकिकान्यत्वानिवेशेऽपि न क्षतिरिति ध्येयं। योगजधर्मसामान्यलक्षणप्रत्यासत्तिस्वीका
रेऽनुभवमेव प्रमाणयति। योगिनामित्यादिना। योगिनां योगजधर्मसंस्कारेण मनसश्चक्षुरादिव्यापारं विनापि सर्वविषयकलौकिकसाक्षा
त्कारोदयात्तस्य सहकारित्वमावश्यकमिति भावः। मयेत्यादिनेति। सर्वत्र प्रमेयेषु चक्षुराद्व्यापारं विनापि प्रमेयत्वेन प्रमेयसामान्यविषयकालौकिक
साक्षात्कारोदयात्तस्यापि सहकारित्वमावश्यकमिति भावः। स्वतंत्रमिति। बहिर्विषयकज्ञानजनकसामग्र्यनपेक्षमित्यर्थः। अबाह्येति। अबाह्यवि
षयकज्ञानजनन इत्यर्थः। अवाप्यानीति। योग्यानीति शेषः। तद्योग्येति। आत्मयोग्यगुणा इत्यर्थः। तदभावः। योग्यगुणाभावः। तद्वृत्तीति। आत्मस
मवेतयोग्यगुणवृत्तिजातिमत्त्वे इत्यर्थः। साक्षात्त्वज्ञानत्वादि। नैकत्वेति। आत्मैकत्वपरममहत्परिमाणे चेत्यर्थः। इदं साक्षात्कारसामग्रीसत्त्वे तत्
तत्संख्यापरिमाणग्राहकसामग्र्यामपि सत्त्वाद्द्रव्यसाक्षात्कारस्य संख्यापरिमाणविषयकत्वनियमेनात्ममानसे तयोरपि भानसंभव इति
भावः। न योग्येऽनलौकिकसाक्षात्कारविषयीभूते इत्यर्थः। अत्र च मनःसंयुक्तसमवायरूपकारणबलाज्ज्ञानादीनामिव तयोरपि मानसे बाध
काभावः। न च सत्यामपि संस्कारादीनां मानसापत्तिः सामग्रीसत्त्वादिति वाच्यं। तत्र ज्ञानापत्तौ संस्कारस्य प्रातिस्विकरूपेण विजातीयगुणत्वेन वा शिवः
प्रतिबंधकत्वकल्पनात्तद्वत्तत्संख्यापरिमाणयोरपि प्रातिस्विकरूपेण प्रतिबंधकत्वे प्रतिबंधकतावच्छेदकवैजात्यस्वीकारे वा गौरवात्तत्संख्यास

शिवः

३०

92

नकिंचिद्बाधकं। नचज्ञानादियोग्यगुणेष्वेव संस्कारस्यापत्तेर्वैजात्यं स्वीकृत्य विजातीयगुणविषयकमानसंप्रति विजातीयगुणत्वेन हेतुत्वात्। नात्मग
वैजात्यस्य तत्संख्यापरिमाणयोः स्वीकारे गौरवापत्तेर्योग्यायोग्यत्वमिति भावः। मनःसंयुक्तसमवायेन विजातीयगुणं विनापि आत्मत्वमान
सजननात् विजातीयगुणस्य विशेषसामग्रीत्वासंभवेन सामान्यसामग्रीत्वात्संस्कारप्रत्यक्षापत्तिः। वारणाय विजातीयगुणभेदत्वे
न हेतुतायां आवश्यकत्वात्। आत्मत्वमानसे आत्मत्वेनापि हेतुत्वं कल्प्यं यित्वा सामान्यसामग्र्याः फलेजननीये विजातीये गुणे आत्मत्वयोर
न्यतरत्वेन सहकारित्वकल्पने संस्कारप्रत्यक्षापत्तिवारणे तादृशगौरवात्तदपेक्ष्य विजातीयगुणभेदत्वेन कारणतायां लाघवं चेत्यादि तिलयोः प्र
त्यक्षत्वस्वीकार एवोचित इत्यस्वरससूचनाय तु इत्यनेन सूचितः। इत्यपिमिति। आत्मन आत्मसमवेतगुणानां च मनसो योग्यत्व इत्यर्थः। ए
रात्मा। पुरुषांतरीयात्मा। तद्गुणाश्च परात्मसमवेतगुणाश्चेत्यर्थः। चकारेण गुणसमवेतजात्यादीनां तदभावानां च संग्रहः। समाधत्ते ने
ति। परायोग्यत्वात् पुरुषांतरीयमनसोऽयोग्यत्वात्। आत्ममानसत्वावच्छिन्नं प्रति विजातीयमनःसंयुक्तसमवेतसमवायत्वेनात्मसम
वेतमानसंप्रति विजातीयमनःसंयुक्तसमवेतसमवायत्वेनैतादृशकार्यकारणभावकल्पनात् पुरुषांतरीयात्मान्यदीयमनसोः संयो
येच वैजात्यानभ्युपगमेन तत्प्रतिप्रत्यक्षापत्तिरितिभावः। प्रसेरन्निति। परमाण्वादिषु चक्षुःसंयोगसत्वादितिभावः। तेषां परमाण्वादीनां। च
क्षुरयोग्यत्वादिति। चक्षुर्जन्यलौकिकसाक्षात्कारायोग्यत्वादित्यर्थः। वक्ष्यमाणलौकिकचाक्षुषसामग्र्यसत्वादितिभावः। महदित्यादि। द्रव्य
वृत्तिलौकिकविषयतासंबंधेन चाक्षुषं प्रति समवायेन महत्वेन एवं उद्भूतरूपत्वेन च हेतुतेत्यर्थः। परमाणोर्महत्वाभावात् आत्मनिरूपा
भावात्। पिशाचादिषु चोद्भूतरूपवत्वाभावान्न तत्प्रत्यक्षमिति सारवंडलार्थः। तदेवाह। परमाण्वात्मत्वादि। तद्रूपस्य पिशाचादिरूपस्य। अनु
द्भूतत्वात्। उद्भूतभिन्नत्वात्। यद्यपि पिशाचादिशरीरस्य वायवीयत्वेन तत्र रूपाभावात् तद्रूपस्यानुद्भूतत्वादिप्रसंगतं तथापि पिशाचादिपदं

नतान्निमित्तकारणपार्थिवोपष्टंभकभागोबाधः। ननुक्तापयवादिविजातीयचक्षुःसंयोगत्वेनैवद्रव्यचाक्षुषंप्रतिहेतुत्वं। परमाण्वादिचक्षुःसंयोगेचवैजात्या
नभ्युपगमान्ननतत्रसाक्षात्कारित्वं(?)इतिकिंमहदुद्भूतरूपादिहेतुतया। नचविजातीयचक्षुःसंयुक्तविशेषणतायाः अभावचाक्षुषहेतुतया वायोरुद्भूत
रूपाभावप्रत्यक्षानुरोधेन तत्रविजातीयचक्षुःसंयोगस्यावश्यकतया वायोश्चाक्षुषत्वापत्तिरिति उद्भूतरूपस्यहेतुत्वमावश्यकमितिवा
च्यं। द्रव्यचाक्षुषजनकतावच्छेदकतया वैजात्यांतरस्वीकारात्तस्यचतत्रानंगीकारात्तु। नचतत्रापिविजातीयचक्षुःसंयोगस्यचाक्षुषापिस
त्वात्चाक्षुषापत्तिरिति उद्भूतरूपहेतुत्वमावश्यकमितिवाच्यं। स्वप्रतियोगिकसंयोगस्यस्वास्मिन्नभावेनचक्षुषिचक्षुःप्रतियोगिकसंयोगाभावादितिवाच्यं चेन्न। विजातीय
क्रियाया एवविजातीयसंयोगनियामकत्वेऽप्यैक्येवचक्षुःक्रियया घटपरमाणौचयुगपत्संयोगस्य तत्परमाणावपि विजातीयसंयोगस्योत्पन्नतया तत्प्रत्यक्ष
तापत्तेर्वारणासंभवात्। नचतत्तद्द्रव्यस्यापिविजातीयसंयोगनियामकतया परमाण्वादिरूपांतरदेशस्यतत्रानियामकत्वकल्पनेन तत्रविजातीयसं
योगइतिवाच्यं। अनंतोत्तरदेशानांविजातीयसंयोगनियामकत्वकल्पनापेक्षया महदुद्भूतरूपादिहेतुतायाएवोचितत्वादिति दिक्। एकेसनेनास्वरसःसू
चितः। सचोद्भूतत्वस्यजातित्वेनीलत्वादिनासंकरप्रसंगः। नचनीलत्वादिव्याप्यंनानैवोद्भूतत्वमितिवाच्यं। तथासतिचाक्षुषत्वावच्छिन्नंप्रतिउद्भूतरूप
त्वेनकारणत्वानुपपत्तेःकारणतानुगमेव्यभिचारादिति। अनुद्भूतत्वेतिनचनीलत्वादिनासांकर्यमत्रापीतिवाच्यं। नीलत्वादिनानानुद्भूतत्वस्यैवोप
गमादनुद्भूतत्वाभावकूटविशिष्टरूपत्वेनचप्रत्यक्षंप्रतिहेतुत्वेनव्यभिचारादितिभावः। प्रसंगाच्चक्षुर्योग्यगुणानाह। योग्यगुणा इत्यादिना। यो
ग्यद्रव्यरूपमिति। योग्यद्रव्यवृत्तिरूपमित्यर्थः। तन्मात्रेति। योग्यद्रव्यमात्रवृत्तीत्यर्थः। ननुतन्मात्रवृत्तीत्यत्रमात्रपदमनर्थकमित्यतआह। मात्र
पदमिति। घटाकाशसंयोगस्याकाशेऽपिवृत्तित्वाद्योग्यद्रव्यमात्रवृत्तित्वमितिभावः। ननुवायुप्रत्यक्षेत्वसंयोगस्यहेतुत्वात्परमाणुवायुप्रभृ
तीनांस्पार्शनापत्तिरितित्वगिंद्रिययोग्यंद्रव्यंत्वचाग्राह्यमेतदेववाच्यं। तत्रकिंनयोग्यमितिहृदिस्थाकांक्षायामाह। त्वचइति। महदित्यादि। नपात्र

द्रव्यदृगिति लौकिकविषयतासंबंधेन त्वाचप्रत्यक्षं प्रति महत्त्वेनोद्भूतस्पर्शवत्त्वेन च हेतुत्वात् तत्प्रत्यक्षापत्तिरिति भावः। सामान्यतो बहिरिन्द्रियप्रत्यक्षत्वावच्छिन्नं प्र
ति उद्भूतरूपत्वेन हेतुत्वात्त्वाचप्रत्यक्षेऽपि रूपं हेतुः। तेन न वायोः प्रत्यक्षमिति हृदयं। यथाक्रमं परमाण्वादिप्रत्यक्षं वारयति जन्येत्यादिना। प्रभाया इति। न च प्रभा हि ते
जसो रूपमित्यनेन प्रभायाः रूपत्वमेव स्यात् न तु द्रव्यत्वमिति वाच्यं। तदन्यमतानुसारेणेत्युक्तत्वादिति। प्रसंगात्त्वगिन्द्रिययोग्यगुणानाह गुणेष्वेवेत्यादिना। त्वचो
योग्या इति शेषः। चक्षुषा योग्यस्य रूपस्यापि त्वचा ग्रहणप्रसंगादुद्भूतेति विशेषणं। इति। महदुद्भूतस्पर्शवन्मात्रेति। तन्मात्रवृत्तित्ववचनादितरावृत्तित्वे सति सक
लतद्वृत्तित्वं। महदुद्भूतस्पर्शस्त्वेति। सामानाधिकरण्येन महदुद्भूतेन महत्त्वविशिष्टोद्भूतस्पर्शत्वेत्यर्थः। ननु चक्षुषा योग्या इति यथा मतं आह। अत एवेति।
अत एव चक्षुर्योग्यत्वविशेषणादेव। वाय्विति। वायुपरिमाणस्य चक्षुरयोग्यत्वादित्यर्थः। ननूद्भूतस्पर्शवद्द्रव्येष्वचक्षुर्योग्यगुणस्याप्रसिद्धत्वात् तेनैव वा
रणस्याप्रसिद्धिवारणे कृतं महदित्यादिविशेषणेनेत्यत आह। न चेति। तथात्वं प्रभापरिमाणस्य चक्षुर्योग्यतानुपपत्तिस्तत्र च प्रत्यक्षापत्तिरतस्तद्विशेषणमावश्यक
मेवेति भावः। न च चक्षुर्योग्यत्वविशेषणेनैव परमाणुगुणवारणे अत्रत्यपदमहदिति विशेषणं विशेषणं व्यर्थमिति वाच्यं। त्रुटिपरिमाणस्यापि न वार
णाय प्रकृष्टमहत्त्वपरतया तदुपादानस्यावश्यकत्वात्। मात्रपदव्यावृत्तिमाह। न वा घटेति। उद्भूतस्पर्शवन्मात्रावृत्तित्वात् उद्भूतस्पर्शवदितरवृत्तित्वात् त
था च न तदितरावृत्तित्वरूपं तन्मात्रवृत्तित्वं तस्येति भावः। तत्रादिप्रभायां हि कर्म चेति। तत्र योग्यद्रव्यसमवेतं कर्म त्वचो योग्यमित्यर्थः। वायोरपि स्पा
र्शनप्रत्यक्षवादिमीमांसकमतं दर्शयति। मीमांसका इत्यादिना। लाघवात् त्वाचप्रत्यक्षे रूपस्य हेतुत्वाकल्पनेन लाघवात्। महदिति। महत्त्वविशिष्टो
द्भूतरूपमित्यर्थः। तत्प्रयोजकं त्वाचप्रत्यक्षप्रयोजकं। गौरवात्। प्रभायाः स्पार्शनवारणाय उद्भूतस्पर्शहेतुत्वावश्यकतया त्वाचप्रत्यक्षं प्रति रूपहेतुत्वे गौर
वात्। अत इति। उद्भूतरूपस्य त्वाचप्रत्यक्षाप्रयोजकत्वादित्यर्थः। बहिरिन्द्रियेति। आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिन्द्रियजन्यत्वनिवेशः। अत एव न
निरसाधारण्यमपीति भावः। तदभावात् उद्भूतरूपाभावात्। नैवमिति। न वायोः स्पार्शनमित्यर्थः। लाघवादिति। बहिरिन्द्रियजन्यद्रव्यसाक्षात्कार
त्वापेक्षया द्रव्यचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वे लाघवादित्यर्थः। अत्र मीमांसकानामयमाशयः। आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिन्द्रियजन्यद्रव्य

त॰प्र॰

३२

32

प्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवादुद्भूतरूपस्य कार्यतावच्छेदकं बहिरिन्द्रियप्रत्यक्षत्वं वाच्यं। तत्र च बहिरिन्द्रियत्वानामात्मान्यत्वं मनसविषयान्यत्वं वेत्यनिर्वक्ति
मनो विरहः। अथ प्रमत्वं प्रत्यक्षत्वमेव तत्कार्यतावच्छेदकं स्पंदसमवायिकारणतावच्छेदकतया च मूर्तत्वं जातिरिति चेत् तथापि प्रभायाः स्पार्शनवारणायोद्भूत
स्पर्शस्य स्पार्शनप्रतिहेतुत्वावश्यकतया चाक्षुषत्वमेव रूपजन्यतावच्छेदकमुपेयते न तु प्रत्यक्षत्वं वायोः प्रत्यक्षसंदेहे न तस्य संदिग्धव्यभिचारकत्वात् तत्
उद्भूतपरित्यज्य च निश्चिताव्यभिचारकं रूपं गृह्यमाणाव्यभिचारकेण कार्यत्वकल्पनायामयोग्यत्वादिति। तथा च वायोः स्पार्शने बाधकाभावः। साधिकाचसे
मीरो यमं दोषि विहरतीति प्रतीतिः। न चोद्भूतस्पर्शेन वायोरनुमानात् त्वगादृशप्रतीतिरित्यनुपपत्तिरिति वाच्यं। वाय्वादिप्रतीतिसंभावनं विनापि तादृशप्रतीते
र्जायमानत्वात्। अन्यथा घटं स्पृशामीति प्रतीतेरनुमानादिनैवोपपत्तौ घटादीनामपि स्पर्शनोच्छेदापत्तिरिति। अत्राहुर्नैयायिकाः। कारणाभावात् कार्या
भाव इति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वं न च चक्षुर्त्वप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपत्वेनाहेतुत्वे प्रत्यक्षसामान्याभावे उद्भूतरूपाभा
वस्य उद्भूतस्पर्शाभावस्येति विशेषाभावकूटस्य प्रयोजकत्वं वाच्यमिति गौरवात्। मन्मते चोद्भूतरूपाभावस्येति लाघवं। उद्भूतरूपत्वेनाकारणत्वे च तद
वच्छिन्नाभावस्य प्रयोजकत्वासंभवात् हेतुत्वमावश्यकमेव। ननु तदुद्भूतस्पर्शत्वे हेतुत्वमादाय विनिगमनाविरहः। एवं मन्मते वायोरिव मन्मते प्र
भायाः प्रत्यक्षानंगीकारादिति चेन्न। इत्थं परिदृश्येति गमकस्य चन्द्रप्रभामण्डलस्यैवोपस्थितेः तयोस्तस्य च प्रत्यक्षानंगीकारे इत्थं विनिगमकाभावे प्रती
त्यनुपपत्तेः। संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात्। एवं संयोगविभागलिंगकं चंद्रतारायोगत्यनुमानं न स्यात्। न च पूर्वोत्तरदेशयोश्चंद्रस
हेकृपत्वं भानुपत्वं भाभ्यां संयोगविभागयोरनुमानात् ताभ्यां गत्यनुमानमिति वाच्यं। प्रभामण्डलरूपयोस्तयोर्भवन्मते प्रत्यक्षत्वात्। तस्मात् प्रभाया
श्चाक्षुषांगीकारस्यावश्यकत्वात् उद्भूतस्पर्शत्वेन कारणत्वासंभवः। न च मूर्तत्वं प्रत्यक्षस्य नित्यसाधारणत्वात् कथं जन्यतावच्छेदकत्वमिति वाच्यं। सम शिव:
वायकालिकविशेषणतोभयसंबंधेन प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वात्। एवं रीत्या सिद्धे कार्यकारणभावे वायोरूपाभावेन न तत्प्रत्यक्षमिति। वायुर्वा ३२

तीतिप्रतीतिरनुमानादिनैवोपपादनीया। घटादौ चाक्षुषत्वेन न तत्प्रतीतेः प्रत्यक्षमेवेति। ननु गगनघटसंयोगस्पार्शनवारणाय विजातीयसत्त्वस्पार्शनं प्रति सामा
नाधिकरण्यसंबंधेन स्पार्शनाभावस्य प्रतिबंधकतावच्छेदकतया वायोः स्पार्शने वायुस्पर्शस्पार्शनानुपपत्तिः। चतुरणुकस्पार्शने व्यभिचारवारणाय सति
विजातीयत्वनिवेशः। चेज्ज्ञात्यं चेद्द्रव्यमात्रवृत्ति न गुणकर्मसाधारणं। न च प्रतिबध्यकतावच्छेदककोटौ विजातीयसत्ति स्पर्शान्यत्वनिवेशान्नानुपपत्तिरिति वा
च्यं। तथा सति विजातीयसत्त्वस्पर्शान्यत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात्। एवं च त्वक्संयुक्तसमवायरूपसामान्यसामग्र्या स्पार्शना
भावाभावरूपकारणं विनापि वायुस्पर्शस्पार्शनजननात्तस्य विशेषसामग्री तासंभवेन त्वक्संयुक्तसमवायरूपसामान्यसामग्रीबलाद्गगनघटसंयो
गस्पार्शनापत्तेर्दुर्वारत्वाच्च। न च स्पर्शस्पार्शनं प्रति स्पर्शत्वेन रविहेतुत्वं कल्प्य। पित्वा सामान्यसामग्र्या द्रव्यसमवेतस्पार्शनत्वावच्छिन्नजननीयेऽस्पा
र्शनाभावाभावस्पर्शयोरन्यतरस्य सहकारित्वकल्पनान्नानुपपत्तिरिति वाच्यं। तथा सति प्रतिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पार्शत्वेन
हेतुत्वकल्पने न च वायोरप्रत्यक्षत्ववादिमते गौरवादिति वायुप्रत्यक्षत्वस्वीकार एवोचित इति चेन्मैवं। तादृशप्रतिबंधकाभावं विनापि त्वक्संयुक्त
समवायेन द्रव्यस्पार्शनजननात्तस्य विशेषसामग्री तासंभवेन सामान्यसामग्रीबलाद्गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वात्। सार्द्रत्वस्पार्शनं प्र
ति सार्द्रत्वेनापि कारणत्वं कल्प्य पितासामान्यसामग्र्या फलजननीये तादृशप्रतिबंधकाभावसार्द्रत्वयोरन्यतरस्य सहकारित्वकल्पनादापत्तिवार
णत्वाति गौरवात्। तद्रूपस्य गगनघटसंयोगस्पार्शनवारणाय स्पार्शनाभावविशिष्टविजातीयसत्त्वेनैव तादात्म्येन प्रतिबंधकत्वौचित्यात्। विजातीय
सत्त्वे स्पार्शनाभाववैशिष्ट्यं च सामानाधिकरण्यघटितसामानाधिकरण्यसंबंधेन। न च विजातीयसत्त्वस्पार्शनाभावयोर्विशेषणविशेष्यभा
वे विनिगमनाविरह इति वाच्यं। विजातीयसत्त्वविशिष्टस्पार्शनाभावत्वेन प्रतिबंधकत्वे सामानाधिकरण्यस्यैव प्रतिबंधकतावच्छेदकसंबंधत्व
गौरवात्। स्पार्शनाभावविशिष्टविजातीयसत्त्वेन प्रतिबंधकत्वे तु तादात्म्यस्यैव प्रतिबंधकतावच्छेदकतया लाघवात्। प्रतिबध्यतावच्छेदकं च

स्पर्शान्यस्पार्शनत्वं। तेन वायोरप्रत्यक्षत्वेपि न तत्स्पर्शस्पार्शने व्यभिचारः। न च तमाऽऽत्मप्रतिबंधकाभावं विनापि वायुस्पर्शस्पार्शनजननात्तस्य विशेष
सामग्रीत्वासंभवेन सामान्यसामग्रीबलाज्जगनघटसंयोगस्पार्शनापत्तिरिति वाच्यं। स्पर्शस्पार्शनं प्रति स्पर्शत्वेनापि हेतुत्वकल्पनेन सामान्यसाम
ग्र्याः फलेजननीये स्पर्शनत्वावच्छिन्नप्रतिबंधकाभावयोरन्यतरस्य सहकारित्वोपगमात्। न च प्रतिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशे न स्पर्शत्वे
न हेतुत्वकल्पनेन च वायोः प्रत्यक्षत्वानंगीकारे गौरवात् वायुप्रत्यक्षतास्वीकार एवोचित इति वाच्यं। वायुप्रत्यक्षत्वानंगीकारे प्रकारांतरेण लाघव
संभवात्। तथाहि। परमाण्वादिपदे सन्निकर्षबलाद् द्रव्यत्वस्पार्शनवारणाय द्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनत्वसमवायेन हेतुत्वं वा
च्यं। तत्र च तुरंगस्य स्पार्शने व्यभिचारवारणाय द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वं कार्यतावच्छेदकमुपेयं। तस्य च साक्षिन्नद्रव्यसमवेतस्पार्शन
त्वस्य कार्यतावच्छेदकत्वमादाय विनिगमनाविरहः। वायोरप्रत्यक्षत्वे तु वायुस्पर्शस्पार्शने व्यभिचारेण द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वस्य कोयुता
वच्छेदकत्वासंभवेन साक्षिन्नद्रव्यसमवेतस्पार्शनत्वस्यैव कार्यतावच्छेदकतया विनिगमनाविरहासंभवात्। न चैवमसन्निकृष्टगुणकर्मस्पा
र्शनापत्तिरिति वाच्यं। एकाश्रयघटितसन्निकर्षाद्वित्वादिप्रत्यक्षवारणाय विजातीयसत्स्पार्शनं प्रति सामानाधिकरण्यसंबंधेन त्वक्संयोगाभा
वस्य प्रतिबंधकत्वावश्यकतया तेनैवासन्निकृष्टगुणकर्मस्पार्शनापत्तिवारणसंभवात्। न चैवं त्वक्संयुक्तसमवायहेतुतायामेव बीजाभावः येन तत्कार्य
तावच्छेदके विनिगमनाविरहः। वायुप्रत्यक्षत्वे वायुस्पर्शस्पार्शनेवादिमते प्रसज्येते इति वाच्यं। असन्निकृष्टद्रव्यत्वादिस्पार्शनवारणाय त्वक्संयुक्तस्पार्शनत्वसम
वायत्वेन साक्षिन्नद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रति हेतुता। तत्र च द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहः। वायोरप्रत्यक्षत्वेन वायुस्पर्शस्पार्श
नेव्यभिचारात्। वायुप्रत्यक्षत्ववादिमते तु द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहेण अनंतपुरुषभेदभिन्नानंतसन्निकर्षहेतुत्वकल्पनापत्त्या
वायोरप्रत्यक्षत्वांगीकार एवोचितः। एतन्मते उक्तरूपेण स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन च द्वित्रियजौरवसंभवेपि पुरुषभेदभिन्नसन्निकर्षहेतुत्वकल्पनापेक्षया

लाघवान्नपायादिति सिद्धांतानुयायी पंथाः। न च यस्त्वक्संनिकृष्टद्रव्यत्वस्पार्शनवारणाय पुरुषभेदभिन्नसंनिकर्षत्वेनोपेयत्वे ऽपि त्वक्साङ्गिन्नसमवेत
स्पार्शनं प्रति स्वप्रवृत्तिप्रागभावप्रतियोगित्वविधिः । एवं यत्त्वक् तिस्पार्शनं विषयतासंबंधेन तद्घटसमवेतसंबंधेन क्षतिमत्त्वेनैव कारणत्वं स्वद्वितीत्वं
चकालिकसंबंधेन। एवं च वायुप्रत्यक्षत्वस्वीकारे पुरुषभेदभिन्नसंनिकर्षहेतुतायां तत्कार्यतावच्छेदके उपदर्शितगौरवस्यानवकाशः। त्वक्त्वत्वस्यैवाकल्पनात्
न च क्षतिकार्यतावच्छेदके द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरह इति वाच्यं। नवनीते स्पर्शान्यत्वविशेषेण स्पार्शत्वेन तत्त्वकल्पनेन च
गौरवस्यातिस्फुटत्वात्। वस्तुतस्तु व्यापकधर्मेण कारणतायां [redacted] द्रवकार्यतायाः कल्पनात् द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वेन कार्यतावच्छेदकत्वासं
भवात् त्वक्ङ्गिन्नस्पार्शनत्वस्यैव वायुप्रत्यक्षतावादिमतेऽपि संनिकर्षकार्यतावच्छेदकत्वादित्याहुः। वस्तुतस्तु गुरुत्वाद्यतीन्द्रियप्रत्यक्षवारणाय तेषां तत्तद्व्य
क्तित्वेन प्रतिबंधकत्वे गौरवाल्लाघवेन विषयत्वेनैव लौकिकप्रत्यक्षं प्रति तद्विषयत्वं च लौकिकविषयतया साक्षात्कारवत्त्वमेव। तथा च तेनैव गगनघ
टसंयोगस्पार्शनवारणेन तदनुरोधेन स्पार्शनं प्रति स्पार्शनाभावप्रतिबंधकत्वमिति न वायुस्पर्शस्पार्शनानुपपत्तिः। न चैवं विषयत्वाभावादे
व नीरूपस्पर्शवारणे रूपहेतुत्वमनावश्यकमिति वाच्यं। घटादेः पाकादिना नीरूपतादशायां लौकिकप्रत्यक्षतापत्तेः रूपहेतुत्वस्यावश्यकत्वादित्यन
मनन्यजन्यनेन। समवायातीन्द्रियवादिवैशेषिकमतं दूषयितुं तन्मतं उपन्यस्यति। वैशेषिकास्त्विति। न प्रत्यक्षः। नेन्द्रियजन्यलौकिकसाक्षात्का
रविषयः। संबंधप्रत्यक्ष इति। संबंधत्वस्य समवायसाधारणत्वादिति भावः। ननु तादृशकार्यकारणभावे मानाभाव इत्यत आह। कथमन्यथेति।
अन्यथा[redacted]दृशाकार्यकारणभावाकल्पने प्रत्यक्ष इति। न चापि। चक्षुःसंयुक्तसमवायरूपकारणसत्त्वेन द्रव्यसमवेतचाक्षुषापत्तेरिति भावः। न च
वेति। नहीत्यर्थः। न पादेतुतायामिति। संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षहेतुतायामित्यर्थः। घटाकाशसंयोगप्रत्यक्षापत्तिरेवात्र मानमित्याशंक्य निराचष्टे
न चेत्यादि। योग्येति। द्रव्यत्वादिजातेर्योग्यमात्रसमवेतत्वाभावाद्योग्यत्वं तस्मात्तागुणस्येति योग्यत्वादिति। घटाकाशसंयोगस्यायोग्याकाशवृत्ति

त्वेनायोग्यत्वादिति भावः। नन्वेवं वायुस्पर्शस्य शब्दस्य च प्रत्यक्षं न स्यात् तयोरयोग्यवृत्तित्वादित्यत आह। किंचेति। लाघवात् संबंधप्रत्यक्षापेक्षया लाघवा
त्। लाघवमेवाह। संबंधत्वं हीति। संयोगत्वस्य जातिरूपतया लाघवमस्त्येवेति भावः। घ्राणग्राह्यगुणमाह। घ्राणग्राह्य इति। तत्र तं गंधगतं सामान्यं गंध
त्वादि तयोः। गंधगंधत्वयोः। अत एव गंधे सुरभित्वसामानाधिकरण्यविशेषणं दत्त। उक्तत्वविशेषणव्यावृत्तिमाह। अवद्येति। रसनयोग्यगुणमाह।
रसनेति। श्रवणयोग्यमाह। श्रवणेति। ननु चक्षुरादीनां ग्राहकत्वे निमीलितनयनस्यापि तद्रूपापत्तिरित्यत आह। तस्य चेति। सन्निकृष्टार्थग्राहक
त्वात्। सन्निकृष्टार्थमात्रग्राहकत्वात्। असन्निकृष्टार्थाग्राहकत्वादिति यावत्। सहकारिणः प्रत्यक्षजननीये अपेक्षणीया इत्यर्थः चक्षुरिन्द्रियसंयोगादेरपि प्रत्यक्ष
हेतुतया निमीलितनयनस्य प्रत्यक्षापत्तिरिति भावः। नन्विंद्रियत्वस्य तेजस्त्वादिना संकरजातित्वाभावेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नप्र
ति इंद्रियतत्संयोगयोर्हेतुत्वमिति चेन्न। इंद्रियनिष्ठवैकत्वयुवैजात्यं स्वीकृत्य विजातीयैकत्वेनैव तद्धेतुत्वात्। न च चक्षुःसंयोगदशायां स्पार्शनवार
णाय त्वक्संयोगदशायां च चाक्षुषवारणाय चक्षुस्त्वक्संयोगयोश्चाक्षुषस्पार्शनहेतुत्वावश्यकतयेन्द्रियसंयोगादेः प्रत्यक्षसामान्ये हेतुत्वे माना
भाव इति वाच्यं। प्रत्यक्षसामान्यानुत्पादे चक्षुःसंयोगाभाववत्त्वक्संयोगाभावादीनां प्रयोजकत्वे गौरवात्। लाघवेनेंद्रियसंयोगाभावस्यैव प्रयोजक
त्वेनेंद्रियसंयोगहेतुत्वावश्यकत्वात्। अकारणविरहस्याकार्यविरहाप्रयोजकत्वात्। इंद्रियसंयोगस्य संयोगेनेंद्रियस्य वा हेतुत्व ~~[illegible]~~
~~त्वावश्यकत्वात्। अकारणविरहस्याकार्यविरहाप्रयोजकत्वात्~~ कर्षाणां द्रव्यादिग्राहकत्वे आत्मनः प्रत्यक्षानुपपत्तिः। तत्र संयुक्तसमवायाभावा
त्। एवं रूपादेरपि तत्र संयोगाभावादिति प्रत्येकमेव द्रव्यादिग्राहकता वाच्या। तत्र केन किं गृह्यत इति पृच्छति। अथ केनेति। संयुक्तसमवायस्य
गुणमात्रग्राहकत्वे शब्दग्रहो न स्यात्। स्वस्मिन्स्वप्रतियोगिकसंयोगाभावेन श्रोत्रसंयुक्तसमवायस्य शब्दे सत्वादत आह। शब्देतर इति। जातिः द्र
व्यत्वादिः। संयुक्तसमवेतसमवायस्य शब्दे सत्वाच्छब्दग्रहणानुपपत्तिः। शब्देतरगुण इति। शब्देतरेति गुणविशेषणं। तत्र समवाये अभावे च। तयाच

पंचविध सन्निकर्षाभावेन विशेषणतयैव तद्ग्रह इति भावः। तस्य घटाभावस्येत्यर्थः। अग्रे च तस्य घटाभावस्येत्यर्थः। नन्विंद्रियसन्निकृष्टविशेषणताइंद्रियसं
युक्तविशेषणता। तथा च रूपादौ रसत्वाभावग्रहानुपपत्तिरित्यत आह इंद्रियसन्निकृष्टेति। बहुविधेति। इंद्रियसंयुक्तविशेषणताइंद्रियसंयुक्तसमवे
तविशेषणतेत्यादिरीत्या बोध्यं। इंद्रियसंयुक्तसमवेन विशेषणतया रूपादौ रसत्वाभावग्रहसंभवान्नानुपपत्तिरिति भावः। बहुत्वात् संयुक्तस
मवायादिभेदेन बहुविधत्वात्। ननु रूपादिग्रहार्थमवश्यमभ्युपेयतया संयुक्तसमवायप्रत्यासत्त्यैव घटादिग्रहसंभवे संयोगस्य प्रत्यासत्तित्वे
नेत्याशंक्य तेनान्विति। न प्रत्यासत्तिः। न द्रव्यग्राहकप्रत्यासत्तिः। मानाभाव इति शेषः। ननु घटादिग्रहान्यथानुपपत्तिरेव मानमत आह संयुक्तेति। त
[redacted]दसंभवात्। संयुक्तसमवायासंभवात्। तस्या आत्मनः। तथा चात्मप्रत्यक्षे संयोगहेतुताया आवश्यकत्वेन तत्रैव द्रव्यप्रत्यक्षत्वमेव तज्ज
न्यतावच्छेदकमुपेयत इति भावः। ननु द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायहेतुत्वेन तत एवोपपत्तेर्न चक्षुःसंयोगहेतु
त्वेन। यदि चात्मप्रत्यक्षे क्लृप्तत्वात् सामान्यतो द्रव्यप्रत्यक्षत्वमेव जन्यतावच्छेदकमुपरीक्रियते तदा सत्प्रत्यक्षत्वमेव तथास्तु। न च सत्प्रत्यक्षत्व
स्य तथात्वे रूपादिचाक्षुषानुपपत्तिरित्यन्यथानुपपत्तिरेव तत्र बाधकमिति वाच्यं। तथा सति चक्षुःसंयुक्तसमवायेनैव घटादिचाक्षुषोपप
त्तेर्न द्रव्यप्रत्यक्षत्वं जन्यतावच्छेदकं। साधकाभावस्यैव प्रकृते बाधकत्वादित्यत आह संक्षेपत इति। चक्षुःसंयुक्तसमवायस्य व्यापकादिरू
पे पि सत्वात्तच्चाक्षुषापत्तेश्चक्षुःसंयुक्तचाक्षुषत्वनिरूपितसमवायत्वेन तद्धेतुत्वं वाच्यं। तत्र च द्रव्यचाक्षुषे व्यभिचारवारणाय द्रव्यान्यसत्वचाक्षुष
त्वस्य विजातीयसत्वचाक्षुषत्वस्य वा तज्जन्यतावच्छेदकत्वमुपेयं। एवं च द्रव्यचाक्षुषत्वस्यासंग्रहीततया चक्षुःसंयोगहेतुताया आवश्यकी तिहस्यांस
योगप्रत्यासत्तेरिति। परमाणौ महत्वं नास्तीति प्रसंगात्परमाणौ विषये आलोको नास्तीति प्रत्ययाद्युटे पि चक्षुःसंयोगस्यावश्यकत्वाच्चक्षुःसंब
द्धविशेषणतायाएवाग्राहकत्वादिति भावः। महदुद्भूतेति। महत्वविशिष्टोद्भूतरूपविशिष्टालोकनिरूपितसंयोगो द्रव्यचाक्षुषप्रत्यक्षे कारणमित्यर्थः।

सइति। महदुद्भूतरूपालोकसंयोगइत्यर्थः। नन्वेवमिति। एवमालोकप्रतियोगिकसंयोगस्य हेतुत्वे जन्यसंयोगाभावात्तेजोन्तरप्रतियोगिकसंयोगा
भावात्स्वस्मिन्प्रतियोगिकसंयोगानभ्युपगमादिति भावः। तत्प्रभादीपप्रभा। दीपप्रभायां दीपसंयोगस्यैव सत्वादुक्तौ मणिप्रभादावि
ति। मणेः पार्थिवत्वेन तत्संयोगस्याहेतुत्वादिति भावः। ननु मणिप्रभायां सौरालोके संयोगस्यैव सत्वादत आह। इष्टापत्तेश्चेति। महांधकार इ
त्यत एव सौरालोकव्यवच्छेदः। अंधकारे घटादिप्रत्यक्षवारणाय नत्वालोकसंयोगस्य हेतुत्वमात्रेण आलोकप्रत्यक्षे न हेतुत्वेन मानाभावः।
अंधकारेपि तत्प्रसंगोद्धारात्। अत आलोकभिन्नद्रव्यचाक्षुषत्वावच्छिन्नप्रत्येव तस्य हेतुत्वमतो न व्यभिचार इत्याशंकते। अप्येति। सु
वर्णेति। सुवर्णस्यालोकभिन्नत्वाभावेन तच्चाक्षुषत्वस्यालोकसंयोगकार्यतावच्छेदकानाक्रांतत्वादिति भावः। आलोकसंयोगइति। आ
लोकनिष्ठः संयोगो हेतुरित्यर्थः। अत्रालोकप्रतियोगिकत्वे घटादौ नीतः। तत्रालोकप्रतियोगिकसंयोगाभावादालोकवृत्तिसंयोगत्वेनैव हेतुत्वा
दिति भावः। तस्यालोकसंयोगस्याधिकत्वादालोकालोकभिन्नोभयवृत्तित्वात्। एवमुक्तरीत्या आलोकसंयोगस्यालोकेपि सत्वात्सुवर्णे
ति। तत्राप्यालोकान्तरसंयोगस्य सत्वादिति भावः। अनभिभूतेति। अनभिभूतं रूपं यस्येति व्युत्पत्त्या अनभिभूतरूपविशिष्टालोकसं
योगस्य हेतुत्वमस्मिन्न विशेषणासंभवः सुवर्णरूपस्याभिभूतत्वात्। तथा च चाक्षुषत्वावच्छिन्नं प्रति अनभिभूतरूपविशिष्टालोक
संयोगस्य हेतुत्वमिति भावः। अन्यथा सुवर्णरूपस्याभिभूतत्वे इत्यानरेति। अंधकारे घटादौ सुवर्णसंयोगात् ग्रहणापत्तेरिति। अभिभू
तत्वं तत्समसमये [illegible] इति भावः। बलवत्सजातीयग्रहणकृताग्रहणं चाभिभव इति। संप्रदायविदस्त्वित्यादि। आलोकेतरद्रव्यचाक्षुषे आलो
कसंयोगस्य हेतुत्वेंधकारे सुवर्णसाक्षात्कारापत्तिरित्यतः सुवर्णभिन्नत्वमालोके विशेषणं। तथा च सुवर्णभिन्नं यत्तेजस्तादृशं सुवर्णां
घटादि [illegible] चेत्तन्मतस्यपक्षे आलोकप्रतियोगिकसंयोगोहेतुः। अतो नांधकारे सुवर्णसाक्षात्कार इत्याचंद्रलार्थः। कार्यतावच्छेदकेगौरवम

शिवः
३५

१६

त्रास्वरसः। केचित्तु द्रव्यचाक्षुषे आलोकसंयोगस्य प्रभासंयोगत्वेनैव हेतुता। प्रभात्वं च सुवर्णमात्रवृत्तिमित्याहुः। सुवर्णादिसंयोगव्यावृत्तवैजात्यमुपेत्य वि
जातीयालोकसंयोगत्वेनैव हेतुत्वमित्यपि केचित्। आलोकसंयोगानवच्छेदकावच्छेदेन चक्षुःसंयोगदशायां घटाग्रहणापत्तेः। तत्रालोक
संयोगस्य च परस्परानवच्छेदकावच्छेदेन सत्त्वादित्यर्थः। तथापीति। तथापि आलोकसंयोगादेर्हेतुत्वेऽपि। परस्परं परादिगवच्छेद
नात्। तद्धसंयुक्तेति। आलोकसंयुक्ते स्पर्शः। पुरुषेणेति। परादिगवच्छेदेन चक्षुःसंयुक्तत्वमितिशेषः। यदवच्छेदेनेति। आलोकसंयोगावच्छे
दकावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वादिति भावः। अपमूर्तयोः समानदेशताविरोधाद् दूरादेश्यैकावच्छेदेन संयोगसंबंधेनालोक
चक्षुषोरभावादालोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगः कथमुपपद्यत इति चेन्न। निविडयोरेव मूर्तयोः समानदेशतानङ्गी
कारात्। आलोकचक्षुषोस्तेजस्त्वेन निविडत्वाभावात्। न च तथाप्यालोकसंयोगस्य कारणताकोटिप्रविष्टत्वान्न कारणत्वमिति
वाच्यं। तादृशचक्षुःसंयोगत्वेन चक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन वा हेतुत्वमिति विनिगमनाविरहेण तस्यापि कारणत्
वात्। न चालोकसंयोगं विनापि विडालादेः सांजननेत्रादेश्चान्धकारे प्रत्यक्षोत्पत्त्या कथं तस्य कारणत्वमिति चेन्न। विजातीयचाक्षुष
प्रत्ये वालोकसंयोगस्य हेतुत्वात् विडालादिसांजनपुरुषीयचाक्षुषप्रत्यक्षं चैतद्वैजात्यमिति। केचित्तु अंजनाभावविशिष्टालोकसंयोगाभावत्वेन द्र
व्यचाक्षुषत्वावच्छिन्नं प्रतिप्रतिबंधकत्वं तदभावत्वेन च कारणता। अंजनाभावस्य स्वयुक्तचक्षुःसंयोगित्वसंबंधावच्छिन्नप्रतियोगिताकः। आ
लोकसंयोगाभावे वैशिष्ट्यं च सामानाधिकरण्येन। आलोकसंयोगाभावस्य स्वसमानाधिकरणत्वसंबंधावच्छिन्नप्रतियोगिताको बोध्यः। ते
न संयोगस्याव्याप्यवृत्तित्वेऽपि न क्षतिः। स विशिष्टाभावः क्वचिद्विशेषणाभावप्रयुक्तः क्वचिद्विशेष्याभावप्रयुक्तः। सांजनपुंसि अंजनाभावविरहप्र
युक्तो विशिष्टाभावः। आलोकसंयोगे वाऽऽलोकसंयोगाभावप्रयुक्त इत्युभयत्रापि प्रतिबंधकाभावसत्त्वमव्याहतं। विडालादिचाक्षुषमभिचारवारणा

~~[illegible]~~च तत्सुरुषीयत्वं निवेशनीयमिसाकूतः। समवायाभावग्रहार्थमेव विशेषणताप्रत्यासत्तिरित्युक्तं तन्न समवायाभावयोः प्रमाणास
त्त्व एव संभवतीति तदेव नेत्याशंकते। स्यादेतदिति। समवायाभावग्राहकत्वेनैव तत्प्रत्यासत्तित्वं स्यादत आह। समवायेति। प्रमाणासत्त्वे कल्पनं तयोरसत्त्वमत आह। न
हीति। तथाच प्रमाणाभावस्य प्रमेयाभावव्याप्यत्वात्तयोरसत्त्वमिति भावः। नन्वयं घट इत्यादिप्रत्यक्षं घटघटत्वयोः संबंधविषयकं। तत्र च समवायातिरिक्त
संयोगादीनां बाधात्समवायसिद्धिः। तथाचेतरबाधसहकृतप्रत्यक्षप्रमाणस्यैव संभवात्कथं प्रमाणाभाव इत्याशंकते। अयं घट इत्यादि। ननु समवायातिरि
क्तस्यैव कस्यचित्संबंधस्य सत्त्वात्कथमितरबाध इत्यत आह। नहीति। तेषां घटत्वरूपचलनादीनां। अन्यः संबंधः संयोगादिः। सत्त्वादिति। तथाच समवायाति
रिक्तस्याधाराधेयभावाख्यस्य स्वरूपसंबंधस्य सत्त्वात्तद्विषयकत्वेनैव प्रतीतेरुपपत्तेर्न तदन्यथानुपपत्त्या समवायसिद्धिरिति भावः। नन्वाधारतासमवा
य इति सिद्धं समवायेनेत्यत आह। नहीति। पटादावपीति। सत्त्वात्। समवायस्य सत्त्वात्। तथाच समवायस्यैवाधारतात्वे पटादावपि समवायरूपघटत्वाधा
रतासत्त्वेन तत्रापि घटत्वविशिष्टबुद्ध्यापत्तेः समवायातिरिक्तैवाधारता स्वीकार्या। तथाच किं समवायेनेति भावः। ननु पटे घटत्वसमवायाभावादेव न त
थाप्रतीत्यापत्तिरत आह। एक एव हीति। तत्सिद्धेरिति। तथाच समवेतमिति प्रतीतेः स्वरूपसंबंधविषयकत्वेनोपपादयितुमशक्यत्वात्समवायस्वी
कार इति भावः। वस्तुतस्त्वयं घट इत्यादिप्रतीतीनामनंतस्वरूपसंबंधविषयकत्वे गौरवात्लाघवेनातिरिक्तसमवायविषयकत्वमिति ध्येयं।
समवाये प्रमाणमुक्त्वाभावे तदाह। न चेति। असन्निति। अप्रामाणिक इत्यर्थः। तत्सिद्धेः। अभावसिद्धेः। ननु न वयमभावो नास्तीति ब्रूमः किंतु तस्याधिक
रणस्वरूपत्वेनैवोपपत्तेरतिरिक्तत्वे मानाभाव इति प्राभाकरमतमनूपदर्शयति। अत्र प्राभाकरा इति। अतिरिक्तः। अधिकरणादतिरिक्तः। तद्ग्रहोपाय। अ
भावग्रहाय। प्रत्यासत्तीति। विशेषणतारूपप्रत्यासत्त्यंतरकल्पनेनेत्यर्थः। यद्यपि समवायग्रहार्थमेव प्रत्यासत्तिस्त्वयांगीकारस्तथाप्यभावग्राहक
त्वेन तत्प्रत्यासत्तित्वं यन्नैयायिकैरुपेयते तदेव खंड्यत इति भावः। इदं। अभावप्रतीतिविषयीभूतं। नतापत्तिः। अभावस्य स्वरूपत्वापत्तिः। तथाच तत्र घटाभा

ववत्त्वाबुद्धिप्रसंग इति भावः। अभाव इति। अभावाधिकरणतेत्यर्थः। यत्कालावच्छेदेन घटाभावाधिकरणता भूतले उपेयते तस्यैव तत्त्वरूपत्वमंगीक्रियत इति भा
वः। न चाभेद इति। अभेदे अभावाधिकरणयोरभेदे। तथा भावः आधाराधेयभावः। अनवस्थापत्तेरिति। घटाभावे अतिरिक्ताभाववद्घटाभाववत्त्वस्याप्य
तिरिक्तः कल्प्यतां। तथा चानवस्थेत्यर्थः। ननु यद्धर्मविशिष्टे यद्धर्मावच्छिन्नवत्त्वा न प्रतीयते तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्ननिरूपिताधिकरणता नोपेय
ते। एवं च भूतले भूतलत्वावच्छिन्ननिरूपिताधिकरणताभावान्न भूतले भूतलमिति प्रतीत्यापत्तिः। भूतले घटाभावत्वावच्छिन्ननिरूपिताधिकरणता
याः स्वीकाराच्च भूतले घटाभाव इति प्रतीतिरुपपन्नैवेत्यस्वरसादाह। किंचेति। आद्ये तदधिकरणस्य घटाभावस्वरूपत्वे। इदानीमित्यनंतरमि
तिशेषः। अंत्ये। तदधिकरणस्य घटाभावास्वरूपत्वे। अन्यदापीति। घटेनीतेपीत्यर्थः। नन्वतिरिक्ताभाववादिमतेपि घटे आनीते घटाभावो न नश्यति न वा गच्छ
ति तस्यानित्यत्वादभावाच्चेति कुतो न घटाभाववत्ताबुद्धिः। कथं वा भावाभावयोरेकाधिकरणवृत्तित्वरूपो विरोधः। तत्रैवोभयोः सत्त्वात्। अथ घटानधि
करणकालावच्छिन्नतत्तद्भूतलादिकमेव घटाभावस्य संबंधः। तथा च घटवति भूतले तेन संबंधेन तदधिकरणवृत्तित्वरूपविरोधव्याघातोपि
तिचेन्नहि विशिष्टसत्तायामन्यातिरेकेपि यथा विशिष्टनिरूपिताधिकरणताया गुणे सत्त्वात् गुणे गुणकर्मान्यत्वविशिष्टसत्तावानिति न प्रत्ययस्त
था सघटभूतलेपि तत्कालावच्छेदेन घटाभावाधिकरणताया अनंगीकारान्न घटाभाववत्ताबुद्धिप्रसंग इत्यस्वरसादाह। किंच कपालेति। केचित्तु न
नूत्पादविनाशशालिनी एकातिरिक्ताधिकरणतोपेयते तस्याश्च घटे आनीते नाशोपगमेन तद्वत्ताबुद्धिप्रसंग इत्यस्वरसमाकूतसारस्तत्प्रतिक्षणमप्रामा
णिकानंताधिकरणतत्तन्नाशाद्युपगमे गौरवेणातिरिक्ताभावस्यैव कल्पयितुमुचितत्वात्। न च वस्तुकेप्येष दोष इति वाच्यं। मन्मते घटाभावाधिकरणतायाः
घटाधिकरणकालस्यावच्छेदकत्वानुपगमेनानुपपत्त्यभावात्। स इति। घटप्रागभावो घटध्वंसश्चेत्यर्थः। सर्वदेति। प्रागभावनाशकाले ध्वंसानुत्पत्ति
क्षणे चेत्यर्थः। कपालकालमात्र इत्यर्थ इति केचित्तु। अन्यथा प्रागभावध्वंसयोः घटकालेसत्त्वापि प्रमासत्त्वस्वीकारे। कपालप्रमितिरपीति। कपालस्वरूप

त॰प्र॰
३२
37

प्रागभावध्वंसयोरप्रतीतौ कपालमपि कथं प्रतीयेत। प्रयाणमेकेनैव कस्याप्यप्रतीतौ न कस्यापि प्रतीतिः स्यात्। कस्यचित्प्रतीतौ सर्वमेव प्रतीयेतेति भावः। अन्य
था कपालसत्त्वे इत्यर्थ इति कश्चित्। नन्वत्रापि घटकालावच्छेदेन घटप्रागभावध्वंसाधिकरणताया अनभ्युपगमान्न तत्कालेन तद्बाधबुद्धिरित्यस्वरसादाह
ह। किञ्च भोस्सुकृतिन् नन्त्यादविनाशिप्रागभावीमधिकरणतामङ्गीकृत्य घटकाले घटप्रागभावाधिकरणताया नाभ्युपगमेऽसाधिकरणताया अनभ्युपगतेश्च
न तत्कालाबुद्धिरित्यस्वरसान्नू। किञ्चेतीति कश्चित्। तन्न एवमेव दूषितत्वाद्दत्तादेयं। मम साध्यत्वेति। इष्टसम्पत्तौ च श्रवणमननिदिध्यासनध्यानधारणास
माधिकतमनेकविधं दुःखं कोऽपि नानुभवयादित्यर्थः। हि बोध्यं। ननु नित्यसुखाभिव्यक्तेरेव मुक्तित्वेन साध्यतापत्तिरित्यत आह। संक्षेपइति। नैरीश्वरानं
गीकाद्रीश्वरीपानित्यसुखमप्रसिद्धं जीवस्य तु नित्यसुखप्रमाणाभावेन नित्यसुखाभिव्यक्तिर्मुक्तिरिति मुक्तिलक्षणमसंभवि। तस्माद्दुःखध्वंसरूपमुक्ते
रसाध्यत्वापत्तिरिति भावः। इदन्तु चिन्त्यं। तन्मते दुःखध्वंसनिरूपिताधिकरणतायाः साध्यत्वसंभवयेव मोक्षाधिकरणतायाः साध्यत्वोपगमादिति प्रा
भाकरमते न कश्चिद्दोषः। वस्तुतस्तु भूतले घटो नास्ति पर्वते घटो नास्तीत्यादिप्रतीतीनां अनन्ताधिकरणभेदेन तत्तदधिकरणस्वरूपाभावविषयकत्व
कल्पने गौरवात्। एकातिरिक्तघटत्वावच्छिन्नप्रतियोगिताकासत्ताभावविषयकत्वमेव समुचितं। एवं घटवत्ताबुद्धिं प्रति घटाभाववत्ताज्ञानत्वेन प्रतिबं
धकतायां सघटभूतलेपि यत्किंचिद्घटाभावस्य सत्त्वात् घटाभावकूटवत्ताज्ञानत्वेनैव प्रतिबन्धकत्वं वाच्यं। तदपेक्षया घटत्वावच्छिन्नप्रतियोगिताकाभावव
त्ताज्ञानत्वेन प्रतिबन्धकत्वस्यैवौचित्यमित्यादिरीत्याऽतिरिक्ताभावसिद्धिरिति निपुणतरमूहनीयं। तदभावइति। घटाभावाभावस्याप्यभाव इत्यर्थः। शिवः
केवलाधिकरणमित्यादि। केवलाधिकरणं घटाभावानधिकरणं भूतलं। तदभावः घटाभावाभावः। सर्वत्र। घटाभावस्थलेपि। स एव। अधिकरण
स्वरूप एव। ननु सर्वत्राधिकरणस्वरूपत्वे पूर्वदूषणं दत्तमेवेत्यत आह। भवदुक्तेति। एवं घटाभावाभावस्याप्यधिकरणस्वरूपत्वे। तथा च यानि दूषणा ३२
नि अधिकरणस्वरूपत्वपक्षे अनिताभिलन्मतेप्य दिशितानीति भावः। तत्सत्त्वे। घटसत्त्वे। उक्तयुक्तेरिति। आधाराधेयभावानुपपत्तिरूपदूषणादित्यर्थः।

संप्रदायमते। स्वरसंवेदनव्यमनतमात्। नयाऽस्त्विति। अयं अभाववत्त्वेन प्रत्ययः। बाधकाभावात्। अभावत्वे बाधकाभावात्। अन्योन्याभावस्थले शंकते। स्यादेतदिति। अन्योन्यत
ले घटभेदाभिन्नत्वाभावे। आधेये। घटभेदाभिन्नत्वे। तदभेदेति। घटभेदाभेदस्य भेदेऽपीत्यर्थः। भवतु केति। आधाराधेयभावानुपपत्तिरूपदूषणगणोऽप्रसंगादित्यर्थः। प्रा
माणिकत्वादिति। बीजांकुरानवस्थाया इव प्रमाणसिद्धत्वादित्यर्थः। संक्षेप इति। घटभेदाभावो घटत्वस्वरूप इत्यादिबोध्यं सचायमिति। प्रागुक्तयुक्त्या अतिरिक्त
त्वेन सिद्धोऽभाव इत्यर्थः। तत्र प्रथमोद्दिष्टमन्योन्याभावं लक्षयति। तत्रेति। प्रतीतिसाक्षिक इति। इदं प्रतीतिसिद्धमखण्डोपाधिरूपमन्योन्याभावत्वमेवान्यो
न्याभावलक्षणमित्यर्थः। प्राचीनोक्तमन्योन्याभावलक्षणं दर्शयति। यद्धिमाकुरित्यादिना। तादात्म्येति। घटतादात्म्यं हि घटत्वं तत्प्राचीं[redacted] घटा
न्योन्याभावबोधे घटत्वसंबन्धविधया प्रकारतया च प्रतियोगितावच्छेदकमिति द्विविधतया घटत्वस्य भानं तदवच्छिन्नप्रतियोगिताकत्वान्योन्याभावस्येति ल
क्षणसमन्वयः। न च संयोगितादात्म्यं संयोग एवेति संयोगसंबंधावच्छिन्नप्रतियोगिताकसंयोगत्वाभावेऽतिव्याप्तिरिति वाच्यं। तादात्म्यसामान्यसंबंधा
वच्छिन्नेति तदर्थत्वात्। तादात्म्यविशिष्टस्यैव हि तादात्म्यसामान्यं। तादात्म्यं च संबंधता विशेषः प्रतीतिसाक्षिकः घटत्वादिरूपतादात्म्यतादात्म्यत्वेनैव घटा
न्योन्याभावप्रतियोगितावच्छेदकमिति लक्षणसमन्वयः। संयोगत्वाभावे च संयोगत्वेनैव संबंधत्वं न तु तादात्म्यत्वेनेति नानुपपत्तिः। अत्र ध्वंसप्रागभा
वयोरिवान्योन्याभावस्य प्रतियोगितावच्छेदकसंबंधे मानाभावः। न चात्यन्ताभावस्यापि तथास्त्विति वाच्यं। संयोगसंबंधावच्छिन्नघटात्यन्ताभाववत्ताज्ञाने स
त्यपि समवायादिसंबंधेन घटवत्ताज्ञानोदयात् संयोगसंबंधावच्छिन्नघटनिष्ठप्रकारताशालिज्ञानं प्रति संयोगसंबंधावच्छिन्नप्रतियोगिताक घटाभावे
[redacted] न प्रतिबंधकत्वादत्यन्ताभावस्य प्रतियोगितावच्छेदकसंबंधावश्यकत्वादन्योन्याभावस्य च तादृशसंबंधावच्छिन्नप्रतियोगिताकत्वाखण्डोपा
धिरूपत्वमेव तस्य सम्यगित्याकूतेनेत्यस्वरसः सूचितः। तदन्य इति। अन्योन्याभावान्य इत्यर्थः। तथा चान्योन्याभावभिन्नाभाववत्त्वं संसर्गाभावत्वं
तल्लक्षणमिति। अत्र घटो नास्तीति प्रतीतिसाक्षिकोऽभावः संसर्गाभावः। तदन्योऽभावोऽन्योन्याभाव इत्यपि वक्तुमुचितं तथापि नास्तीति प्रतीतेरत्य

ताभाववत्त्वविषयकत्वेनैवोपपत्तेरिति । रिक्तसंसर्गाभावत्वेमानाभावान्न तथोक्तं । सोपि संसर्गाभावोपि । अत्र नासीत् । न तु भवेत्यादि । अग्रे च विनष्ट इत्यादिप्रतीतिप्र
तीप्रदर्शनमत्यंताभावध्वंसयोः प्रमाणप्रदर्शनाय जनु लक्षणोपि तान्नैवेत्यर्थः बोध्यं । नित्यत्वमात्रोक्तौ गगनादेः संसर्गाभावत्वमात्रोक्तौ च ध्वंसप्रागभा
वयोरतिव्याप्तिरित्युभयोपादानं । नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं । ध्वंसस्य च प्रागभावप्रतियोगित्वात्प्रागभावस्य च ध्वंस
प्रतियोगित्वान्न तत्रास्यातिप्रसंगः । एकतरमात्रोक्तौ चान्यतरत्रातिव्याप्तिरिति ध्येयं । उत्पत्तिमानिति । उत्पत्तिमत्त्वमात्रोक्तौ घटादावभावत्वमात्रोक्तौ
चात्यंताभावादावतिव्याप्तिवारणायोभयोपादानं । आद्यक्षणसंबंधउत्पत्तिः स्वाधिकरणक्षणध्वंसप्रागभावप्रतियोगिक्षणसंबंध उत्पत्तिरिति या
वत् । अधस्तात्क्षणयोग्यस्य क्षणयोगो जन्मनि भवेदिति वा । तदर्थश्च स्वाधिकरणक्षणध्वंसानधिकरणसंबंधएवोत्पत्तिरिति नव्यास्तत्र प्रलयादौ कृत्स्नमेतत् कं चि
दपि यदीयसमयसंबंधे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसंबंधउत्पत्तिरित्यर्थः । स्ववृत्तिपदार्थप्रागभावानधिकरणत्वं स्ववृत्तिध्वंसप्र
तियोग्यनधिकरणत्वं वा क्षणत्वं बोध्यं । स च ध्वंसश्चानुत्पत्तिरिवमानमतभाह । नश्यतीति । ध्वंसस्य ध्वंसाप्रतियोगित्ववत्प्रागभावाप्रतियोगित्वमपि स्यादि
ति भ्रमं निराकर्तुमाह । तत्प्रागभावश्चेति । ध्वंसप्रागभावश्चेत्यर्थः । अयं च प्रतियोगिप्रागभाव एव तत्प्रागभावपदेन ग्राह्यः । अत्र प्रतीतिं प्रमाणयति उत्प
त्स्यते इति । प्रतियोगिदशायां प्रतियोगिप्रागभावदशायां चेत्यर्थः । इदमुपलक्षणं ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यनधिकरणत्वनियमेन ध्वं
सस्य ध्वंसस्वीकारे घटोन्मज्जनप्रसंगात् ध्वंसस्य न ध्वंसः । एवं घटप्रागभावकाले ध्वंसाधिकरणत्वप्रसंगात् ध्वंसप्रागभावस्य घटध्वंस प्रागभाव
रूपत्वेपि एवं प्रागभावं लक्षयति । विनाशीति । घटादावत्यंताभावादौ चातिव्याप्तिवारणाय यथाक्रमं विशेषणद्वयोपादानं । ननु प्रागभावांगीका
रे मानाभाव इत्यत आह । स चेति । तथा च भविष्यतीति विषयतया प्रागभावभावावश्यक इति भावः । ननु भविष्यत्त्वस्य वर्त्तमानप्रागभावप्रतियोगित्वरू
पत्वे प्रागभावसिद्धिः । तच्चैव न वर्त्तमानकालोत्तरकालोत्पत्तिकत्वमेव तत्त्वं न च यत्सामग्र्यव्यवहितोत्तरक्षणः स तदुत्पत्तिमानिति आत्माश्रय

घटादि द्वितीयक्षणे घटादेरुत्पत्तिवारणाय प्रागभावस्य हेतुत्वमावश्यकमिति वाच्यं। तत्संतर्भावे न सामग्रीसत्त्वेऽनुपगमात्। अपि तु तदधिकरणत्वेन अभावेन। अस्तु वा त
था। तथापि जन्यद्रव्यत्वावच्छिन्नं प्रति समवायेन द्रव्यत्वेन प्रतिबंधकत्वोपगमेनैतानुत्पत्तेरभावात्। अनंतप्रागभावादिकल्पनामपेक्ष्य एकप्रतिबध्यप्रतिबंध
काभावकल्पनाया एव लाघवत्वादिति चेन्न। इत्थं हि स्वसत्ताकल्पकटस्थले स्वानधिकरणत्वादौ महादोषटोत्पत्तिवारणाय तावत्संयोगानां तत्तद्व्यक्तित्वेन वाल
क्षणक्षितत्वेन कारणत्वमपेक्ष्य एकप्रागभावकारणत्वमेव समुचितं। प्रागभावस्य च प्रतियोगिसमानदेशत्वनियमेन पटादीनां देशनियमोपपत्तिः। न चोत्रिच
तुरेषु तन्तुषु संयुक्तेषु च तन्तुषु तत्पटोत्पत्तिवारणाय न तत्तत्तन्तूनां तत्संयोगानां वा हेतुत्वमावश्यकमिति वाच्यं। चरमतंतुसंयोगव्यक्तेरेव तत्तद्व्यक्ति
त्वेन हेतुत्वोपगमात्। चरमसंयोगानधिकरणतंतावपि तत्पटोत्पत्तिवारणाय तत्तदेवं तत्र तत्सत्त्वापादनवारणसंभवात् प्रागभावस्वीकारस्यावश्यकत्वा
त्। चरमसंयोगस्य चरमतंतुपटं प्रति समवायेन न हेतुता चरमसंयोगानधिकरणतंतावपि तत्पटोत्पत्तेः। किं तु समवायसंबंधेन तत्पटं प्रति कालि
कसंबंधेन चरमसंयोगो हेतुरित्यलमप्रकृतविचारेण। तस्य चेति। प्रागभावस्य चेत्यर्थः। तदुत्तरसत्त्वात् प्रतियोगिध्वंसस्य प्रतीतिप्रमात्वोपपत्तेः। उभयत्रे
ति। प्रतियोगिक्षणयोः प्रतियोगिध्वंसक्षणयोश्चेत्यर्थः। इत्युपलक्षणं। प्रागभावोन्मज्जनप्रसंगो द्रष्टव्यः। नित्यो वेति। नित्यत्वं चात्र प्रागभावाप्रतियो
गित्वे सति ध्वंसाप्रतियोगित्वं ग्राह्यं। अत एव ध्वंसप्रागभावयोर्न विभाग इति भावः। प्रसंगात् संसर्गाभावत्वावच्छिन्नप्रतियोगिताकाभावमतिरिक्तं
साधयितुं प्रपञ्चयितुमारभते। नित्यश्चेत्यादिना। एकमात्र इति। एकमात्रपर्याप्तवृत्तिक इत्यर्थः। अन्यश्चेति। एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगि
ताकश्चेत्यर्थः। न चान्य एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगिताके ऽभावे घटवतीत्यादिप्रतीतिरूपप्रमाणमस्ति तान्योन्याभावभेदेन। घट
वतीति। व्यासज्यवृत्तिधर्मावच्छिन्नाभावानभ्युपगमे तादृशप्रतीत्यनुपपत्तिरिति भावः। न च तादृशप्रतीतेः पटाभावविषयकत्वेनैवोपपत्तेर्नातिरिक्ताभा
वसाधकत्वमिति वाच्यं। तथा सति क्वचिद्धटाभावः क्वचित्पटाभावो विषय इति तादृशानुगतप्रतीत्यनुपपत्तेः। अनुगतधर्मं विनानुगतप्रतीत्यसंभवात्।

नन्वाधारत्वद्वित्वावच्छिन्नप्रतियोगिताकाभावस्यापि द्वित्वमानमेव द्वित्वसमानाधिकरणघटत्वपटत्वावच्छिन्नप्रतियोगिताकाभावानां प्रतियोगितावच्छेदकं त
दुपपत्तेः। तथा च तस्यातिरिक्तत्वे मानाभाव एवेति स्वरसादाह। एकघटवतीति। घटो नास्तीति प्रतीतेर्यदि घटप्रतियोगिताकाभावो विषयस्तर्हि घटद्वयवत्य
पि यत्किंचिद्घटप्रतियोगिताकाभावस्य सत्त्वान्नाद्वयप्रतीत्यापत्तिः। यदि च घटत्वावच्छिन्नाभावो विषयस्तदा एकघटवत्यपि घटो नास्तीति प्रतीत्यनुप
३१ पत्तिरित्यगत्यातिरिक्तो ऽभावो ऽभ्युपेयस्तत्प्रतीतिभावः। तद्घटवति तद्घटान्यघटत्वावच्छिन्नाभावः। घटान्तरवति चेतरान्यघटत्वावच्छिन्नाभावो विषय इत्याव
श्यकम् एकमेव एवेति चेन्न। तथाप्यनुगतधर्मं विनाऽनुगतप्रतीतेरुपपादयितुमशक्यत्वादित्यादेः प्रागेवानिवेदितत्वात्। ननु यत्किंचिद्घटवति घटपटौ न
स्त इति प्रतीतौ द्वित्वसामान्यं न प्रतियोगितावच्छेदकं तथा विधयत्किंचिद्घटसत्त्वेन तदवच्छिन्नाभावासत्त्वान्नापि द्वित्वविशेषः। तत्तद्द्वित्वेनानुप
स्थितेः केवलं घटादिमात्रस्यापि तथाप्रत्ययेन प्रत्येकघटत्वपटत्वादिकमेवापि न तथेति चेत्तस्य तेष्वननुगतप्रत्ययो ऽनुपपन्न एवेति चेन्न। द्वित्वं द्वित्वधर्मिता
वच्छेदकीभूतं घटत्वं पटत्वं च तथा प्रतियोगितावच्छेदकता वा चत्वारि समुदितानीयाया प्रतियोगितावच्छेदकावच्छिन्नं च घटपटोभयमिति नानुपपत्ति
लेशो ऽपीति ध्येयम्। तयोरिति। प्रतियोग्यभावयोरेकाधिकरणावृत्तित्वरूपविरोधादित्यर्थः। नन्वेकस्मिन्नपि समवायेन द्वित्वमस्त्येवेत्यत आह। एको न द्वावि
ति। एकस्मिन्समवायेन द्वित्वस्य सत्त्वेन एको द्वाविति प्रतीत्यापत्तिरतः समवायेन तत्सत्त्वेऽपि पर्याप्तिसंबन्धेन तदसत्त्वान्न तथा प्रतीतिरित्यभ्युपेयम्। ए
वं च प्रतियोगितावच्छेदकपर्याप्त्यधिकरणे नैवाभावस्याविरोधान्न तदनुपपत्तिरिति भावः। प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरो
धात्प्रतियोगिमत्यपि नातिरिक्तविशिष्टाभावो विरुद्ध्यत आह। अत एवेति। प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधात्प्रतियोगिमत्य
पि नातिरिक्तविशिष्टाभावो विरुद्ध्यत आह। अत एवेति। प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधादेवेत्यर्थः। द्रव्यं दण्डिपुरुषो नास्तीति धीः। शिवः
तस्य पुरुषस्य। न च दण्डिविशिष्टो ऽभावः क्वचिच्च पुरुषाभावो विषय इति वाच्यम्। विषयानुगमं विना ऽनुगतप्रतीत्यनुपपत्तिरित्यस्यासकृदावेदितत्वात्। नन्वापा

त्रूपदर्शितरीत्याऽतिरिक्तोभावस्तथापि तद्ग्राहिकानविशेषणताप्रत्यासत्तिः। किंतु चक्षुरादिनावस्त्वादिज्ञानासंभवाद्यथानुमानादेः प्रमाणांतरत्वं तथाऽभावग्रहे रूपमानां सं
योगादिसन्निकर्षाणामभावेन इंद्रियाद्ग्राहकत्वासंभवात् प्रमास्येंद्रियस्याग्राहकत्वात् अन्यथा निमीलितनयनस्यापि घटादिरूपपत्तेरित्यनुपलब्धेरपि प्रमाणां
तरमभावग्राहकमेषितव्यं। न च विशेषणतैव सन्निकर्षः तस्यास्तत्वेनासंबंधत्वेन समवायावृत्तिकारेण समवायग्राहकत्वेनाप्यसंमतत्वात्। तथा च घटाभावस्या
नुपलब्धिरूपप्रमाणजन्यमानुपलब्धमेव ज्ञानं तत्साक्षात्कारः। साक्षात्कारस्येंद्रियजन्यत्वव्याप्यत्वान्न चैवं निमीलितनयनस्यापि घटाभावग्रहापत्तिः।
सद्धामभावेनिरूप्यत इति नियमात्। अभावग्रहेऽधिकरणप्रत्यक्ष[illegible]स्य जनकतया तज्ज्ञानेनार्थमिंद्रियापेक्षणात् अत एव तज्जनकतयाऽन्यथासिद्धमिंद्
रियाभावग्रहे हेतुः। न चाधिकरणप्रत्यक्षस्य व्यापारतया तेन तदन्यथासिद्धिः। व्यापारेणव्यापारिणोऽन्यथासिद्ध्यसंभवात्। अन्यथा चक्षुः सन्निकर्षेण चक्षु
षोऽप्यन्यथासिद्धिः प्रसज्येतेति वाच्यं। इंद्रियस्य जनकत्वसंभवेऽधिकरणप्रत्यक्षस्य तद्व्यापारत्वं तदेव न। रूपमसन्निकर्षाभावात्। एवमनुपलब्धिप्रमाणस्यापि
सत्वात्तत्वार्यथप्रमाणानीत्यप्यसंगतमिति भिक्षुः। भट्टमतं दूषयितुं तन्मतमुपन्यस्यति। भट्टास्त्वित्यादिना। नेंद्रियग्राह्यः। नेंद्रियजन्यले किंतु साक्षात्का
रविषयः। रूपसन्निकर्षाणां संयोगादिपंचानां सन्निकर्षाणां अभावात्। अभावेऽसंभवात्। ननु तर्ह्यभावग्रहणानुपपत्तिरत आह। किंत्विति। इदं प्रमाणां
तरजन्यज्ञाने च सन्निकर्षापेक्षेति नेंद्रियसम्मतमिति भावः। प्रमाणांतरे निधर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वमिति न्यायात्। अनुपलब्धेरूप
प्रविजातीयप्रमाप्रतिकरणत्वकल्पनमपेक्ष्य रूपप्रत्यक्षप्रमाहेतुतया विशेषणतारूपसन्निकर्षकल्पनमेव लघीय इत्यर्थः। तथा चेंद्रियेणैव तद्ग्रह इ
ति भावः। अन्यथेति। सन्निकर्षकल्पनेऽनुपपत्तावपि प्रमाणांतरकल्पने इत्यर्थः। अन्यथा सन्निकर्षांतरकल्पने इत्यर्थ इति कश्चित्। रूपाणां संयो
गादित्रयाणां सन्निकर्षाणां। शंकते। नचेति। प्रत्यक्ष एवाप्रत्यक्षविषय एव। कार्यपक्षः। तथा च जन्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतुत
याऽभावेऽपि सन्निकर्षकल्पनमावश्यकं। सन्निकर्षत्वं च संयोगाद्यन्यतमत्वमिति भावः। ननु एवेऽपि प्रमाणांतरापत्तिरित्यस्य युक्तं। प्रतिबंदेरनुत्तरत्वादित्य

त्यस्य स्वरसादाह। किं चेति। ननु व्यापाराभावेऽपि फलायोगव्यवच्छिन्नकारणत्वरूपकरणत्वमुपपद्यत एव। अत एव साधकतमं करणमिति सूत्रमपीत्यत आह। व्या
पारवदिति। निमीलनदशायामंधकारे चक्षुषोऽपि फलायोगात्केवलं तस्याव्यापारवत्कारणत्व सम्भवधानेयद्व्यवधानेन रक्षणोकार्यासत्तिस्ततमेव फलायोगव्यवच्छिन्न
त्वं वाच्यं। एतस्य च व्यापारवत्कारणपरिति तथा गुरुत्वेन व्यापारवत्कारणत्वरूपस्यैव विशेषेणानुपलब्धेः प्रमाकरणत्वव्याघात इति भावः। उक्तमिति। उक्तप्रायमि
त्यर्थः। वस्तुतस्तु धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेनैव सन्निकर्षकल्पनं न तु प्रमाणान्तरकल्पनमिति पूर्वोक्तयुक्तेरेव रमणीयेति हृदयं। अनुपलब्ध्याख्यप्रमाणानंगी
कारे घटाभाववति घटस्य मनस्संयोगे घटाभावस्य सत्त्वादिन्द्रियसम्बद्धविशेषणतया घटाभावप्रत्यक्षापत्तिः। मन्मते च घटोपलंभसत्त्वेनानुपलब्धेरभावान्नतन्म
स्यापत्तिरित्यनायत्या प्रमाणान्तरकल्पनमावश्यकमित्याशयेन मीमांसकः शंकते। नन्वेवमिति। एवमनुपलब्ध्याख्यप्रमाणान्तरमनंगीकृत्य इन्द्रियसम्बद्ध
विशेषणतायाः अतिरिक्तायाः प्रत्यासत्तित्वे योग्यानुपलब्धेरपीति। घटाभाववति भूतले घटोपलंभेन योग्यानुपलब्ध्यभावादेव चक्षुषा घटाभावप्रत्यक्षजननीयेन
वतामतिरिक्तप्रमाणत्वेनाभ्युपगतायाः योग्यानुपलब्धेः सहकारित्वं कल्प्यते घटाभाववति भूतले घटोपलंभेन योग्यानुपलब्ध्यभावादेव न घटाभावप्रत्यक्षापत्तिरिति
भावः। नन्वेवं किमपि विशिष्टमनुपलब्धेः प्रमाणत्वेन प्रत्युतेन्द्रियस्य कारणत्वे विशेषणतारूपप्रत्यासत्तिकल्पनमाधिकमिति चेन्न। विजातीयप्रमाकल्प
नापेक्षया प्रत्यासत्तिकल्पनाया लघुत्वात् व्यापारवत्त्वाभावेन प्रमाणत्वासंभवस्य पूर्वमेव दर्शितत्वाच्चेति। अभावग्रहे। अभावलौकिकप्रत्यक्षे। प्र
पंचेयमिति। इयं अभावग्रहे हेतुः। योग्यस्यानुपलब्धिरिति। योग्येऽनुपलब्धिरिति वा योग्यानुपलब्धिरिति शब्दार्थ इत्यर्थः। तत्राद्यमाशंकते। योग्यस्ये
ति। जलपरमाणाविति। महत्त्वाभावप्रत्यक्षानुरोधेन विजातीयचक्षुःसंयुक्तविशेषणताया अवश्यमंगीकार्यत्वेन पृथ्वीत्वाभावस्यापि प्रत्यक्षापत्तिरि
ति भावः। दूषणांतरमाह। स्तंभ इति। द्वितीयमाशंक्य निराचष्टे। अयोग्य इति। स्वैकदेशप्रमितं दूषयितुं मतमुपन्यस्यति। यदीति। वायाविति। वायोरयोग्य
त्वादिति भावः। परमहद्द्रव्यसन्नापन्नोऽस्ति विप्रकृष्टं अनुभवेति। वायुर्न रूपवान्परमाणुर्न महानित्यादिप्रत्यक्षप्रतीतीनां विलोपप्रसंगादित्यर्थः। योग्या शिवः
यासावनुपलब्धिश्चेति कर्मधारयमभिप्रेत्याह। अन्योन्येति। योग्यस्य विवरणं सहकारी भिन्नाणां चाभावप्रत्यक्षसामग्री विशिष्टप्रतियोग्यनुपलब्धि ४०

रेवयोग्यानुपलब्धिरित्यर्थः। अत एव। सहकारिसंपन्नत्वरूपयोग्यत्वविशेषणादेव। योग्येति। योग्यसन्निकर्षस्यैवाभावप्रत्यक्षसामग्रीघटकत्वेन परमाणौ न ए
पृथ्वीत्वाभावग्रह इति भावः। ननु महत्त्वोद्भूतरूपवद्विशेषणतायाः पृथ्वीत्वाभावग्राहकत्वेपि नोद्भूतरूपाभावग्राहकत्वं उद्भूतरूपाभाववति वायौ तस्याऽसंभवा
दिति चेदिन्द्रियसंबद्धविशेषणताया एव योग्यसन्निकर्षत्वमुपेयं। एवं च मनस्यप्युद्भूतरूपाभावप्रत्यक्षं स्यादित्यत आह। उद्भूतरूपाभावे त्विति। उद्भू
तरूपाभावग्रहे त्वित्यर्थः। तथा च प्रकृते रूपमात्रे यथा महत्त्वं निवेशनीयमिति भावः। अत आह। महत्त्वविशेषणादुत्तरत्र। उद्भूतरूपाभावग्रहः। वाया
वित्यत्र तन्न दृश्यत इत्यनुषज्यते। ननु महत्त्वाभावग्राहकः कः सन्निकर्षः। एवमन्योन्याभावग्राहको योग्यः सन्निकर्षः कः इत्यत आह। एवमन्यत्रापीति। म
हत्त्वाभावादावपीत्यर्थः। महत्त्वाभावे इन्द्रियसन्निकृष्टोद्भूतरूपवद्विशेषणता योग्यः सन्निकर्षः। अन्योन्याभावे तु यद्धर्मे साक्षादिन्द्रियसन्नि
कृष्टमहत्त्वादिमद्विशेषणता योग्यः सन्निकर्ष इत्यर्थः। ननु कुत्रचिदिन्द्रियसन्निकृष्टमहत्त्वादिमद्विशेषणता कुत्रचिच्चेन्द्रियसन्निकृष्टमहत्त्व
वद्विशेषणता योग्यः सन्निकर्ष इत्यत्र किं नियामकमत आह। कार्यवशादिति। तच्च तत्र तत्राभावग्रहानुरोधादित्यर्थः। ननु पिशाचादिस्तम्भाभावा
दीनामपि प्रत्यक्षापत्तिस्तत्र योग्यसन्निकर्षसत्त्वेन योग्यानुपलब्धिसत्त्वादित्यत आह। पिशाचादिस्तम्भाभावस्त्विति। अयोग्यत्वादिति। अप्रत्यक्षवि
षयस्य हेतुतया अभावप्रत्यक्षे योग्याभावत्वेन हेतुत्वोपगमादिति भावः। अयोग्यप्रतियोगिकस्यापि स्तम्भे पिशाचभेदस्य प्रत्यक्षोदयादाह। अत्यं
ताभाव एवेत्यनुषज्यते। का पुनरत्यंताभावे योग्यत्वेति। गोचरमपि तत्रैव बोध्यं। योग्यमात्रेति। पिशाचस्यायोग्यत्वेन योग्यप्रतियोगिकत्वाभावादिव
गतस्य भावे प्रत्यक्षमिति भावः। घटपिशाचान्यतराभाववारणाय मात्रेति। अतीन्द्रियाहेतप्रतियोगिताकत्वमिति तदर्थः। ननु वायौ रूपसामान्याभाव
प्रत्यक्षानुपपत्तिः। तस्यातीन्द्रियरूपप्रतियोगिकत्वेन योग्यमात्रप्रतियोगिकत्वाभावात्। एवमनुद्भूतत्ववदत्यंताभावप्रत्यक्षापत्तिश्चेत्यस्वरसादाह। यथा
ग्यधर्मेति। पिशाचत्वपरपिशाचान्यतरत्वादीनां योग्यधर्मत्वाभावेन तदवच्छिन्नाभावप्रत्यक्षमिति भावः। वस्तुतस्तु योग्यमात्रप्रतियोगिके योग्यध

कत्वंविशेषणमित्येवपाठः।योग्यमात्रप्रतियोगिके।भावेयोग्यधर्मावच्छिन्नप्रतियोगिता[illegible]१

त.प्र. र्मावच्छिन्नप्रतियोगिताकत्वविशेषणंयोग्यतेत्यर्थः।योग्यमात्रप्रतियोगिकत्वेसतियोग्यधर्मावच्छिन्नप्रतियोगिताकत्वंयोग्यतेतियावत्।तच्चघटभूत
५१ लेघटसामान्याभावप्रत्यक्षवारणाययोग्यमात्रप्रतियोगिकत्वं।एतद्गुरुत्वघटत्वात्यंताभाववारणाययोग्यधर्मेति।वायोरूपसामान्याभावप्रत्यक्षत्वनेष्यत
तएवेतितद्संग्रहेणदोषाय।एतद्रूपएतद्गुरुत्वान्यतरावच्छिन्नाभाववारणायचयोग्यधर्मेत्यस्ययोग्यधर्मेत्यस्ययोग्यधर्ममात्रावच्छिन्नप्रतियोगिता
५१ कत्वमित्यर्थइत्यवधेयं।ननुपिशाचवदन्योन्याभावोप्ययोग्यस्यादेवचनग्रहणमदृत्याचेन्नत्रान्योन्याभावकायोग्यता।नतावद्योग्यप्रतियोगिकत्वं।
स्तंभेपिशाचभेदग्रहणानापत्तेः।पिशाचवद्वृक्षदृग्रहणापत्तेश्चेसत्तभावः।एवमन्यत्रापीति।अन्योन्याभावेपीत्यर्थः।अनुभवानुसारेणेति।गगनत्वभावच्छिन्न
प्रतियोगिताकत्वमेवतत्तदन्योन्याभावयोग्यत्वमित्यर्थः।अतएवकपुनरत्यंताभावेयोग्यतेतिसामान्यतएवात्यंताभावेयोग्यतानिरुक्ता।अ
न्योन्याभावेतु।अननुगतैवसेति।[illegible]ध्येयं।सर्वेति।अत्यंतान्याभावेत्यर्थः।नास्तिमिति।अत्यंताभावेयोग्यमात्रत्यादिरूपा।अन्योन्याभावेतत्तदन्योन्या
भावत्वमित्येवंरूपा।नानैवयोग्यतेत्यर्थः।कोमिति।अंगीकारार्थकमव्ययं।गुणयोग्यतावदिति।यथारूपरसादौउद्भूतत्वादिंद्रिययोग्यत्वमेकत्वाप्र
कपीत्यर्थः।केचित्तुविजातीयचक्षुःसंयोगाश्रयविशेषणतायाअभावयोःकत्वेनपरमाणौनपृथ्वीत्वाभावग्रहः।पिशाचात्यंताभावादिप्रत्यक्षवार
णंतुगुरुत्वादिवत्तादात्म्येनतत्तदभावत्वेनसाक्षात्कारप्रतिप्रतिबंधकत्वांगीकारेणस्यात्।तदसत्।परमाणौमहत्त्वाभावप्रत्यक्षानुरोधेनवि
जातीयचक्षुःसंयोगस्यावृत्तिप्यकतयातेनतत्रपृथ्वीत्वाभावप्रत्यक्षवारणासंभवात्।पूर्वोक्तंचचक्षुरादिकंलक्षयितुमुपक्रमते।अथकिमिंद्रियमितितो
त्रसमिति।आलोकघ्राणादावतिव्याप्तेर्यथायथमुभयोपादानं।चक्षुःपस्तेजसत्वेविवादादाह।रूपग्राहकमिति।रूपग्राहकमात्रोक्तौमनस्यतिव्याप्ति
रतोमहदिति।महत्वमात्रोक्तौघ्राणादावतिव्याप्तिरतोरूपग्राहकमिति।रूपग्राहकंमहदित्युक्तावात्मन्यतिव्याप्तिरतइंद्रियपदं।अत्रकेचित्।चक्षुषो शिवः
प्राप्यकारित्वेचंद्रमसोग्रहणानुपपत्तेः।शाखाचंद्रमसोस्तुल्यकालग्रहणानुपपत्तेश्चअप्राप्यकारित्वमेवतदाचः।एवंचाप्राप्यकारित्वाविशेषाज्जलक ५१

मेव तत्क्षितिपार्थिवत्वमेव तस्ये साक्षात्तद्वत्त्वं । चक्षुषः प्राप्यकारित्वनियमात् । निमीलितनयनस्यापि वायुस्पर्शापत्तेः प्राप्यकार्येव तच्चाक्षुष्यं । चक्षुषस्तेजसत्वेनातिशीघ्रतया चं
द्रमसा सह संयोग उत्पद्यते । शाखाचंद्रमसोस्तुल्यकालग्रहणं प्रसिद्धं । मया युगपच्छतपत्रपत्राणि छिन्नानीतिवत् । तथा च गोलकस्य घटादेः संयोगाभा
वेनातिरिक्तं तैजसं चक्षुः स्वीकार्यमिति । एवमन्यत्रापि बोध्यं । वायवीयमिति । वायवीयत्वमात्रं वायाविंद्रियत्वमात्रं च चक्षुरादावतिव्याप्तमिति निमीलितोपाद
नं । त्वचो वायवीयत्वे विवादादाह । स्पर्शग्राहकमिति । चक्षुर्मनसोरात्मनो वा वारणाय विशेषणत्रयोपादानं । आप्यमिति । जलचक्षुरादावतिव्याप्तिवारणाय विशे
षणद्वयोपादानं । रसनस्याप्यत्वे विवादादाह । रसग्राहकमिति । चक्षुर्मन आत्मनां यथायथं विशेषणत्रयोपादानं । पार्थिवमिति । आस्तां तावत् पूर्ववत् । इंद्रियत्वं च श
ब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं । आत्मन्यतिव्याप्तिवारणाय सत्यंतं निवेशः । शब्दरूपविशेषगुणसत्ता कर्णेऽव्याप्तेः श
ब्देतरेति गुणविशेषणं । चक्षुषि तावद्रूपस्य सत्त्वात् उद्भूतेति । उद्भूतत्वं च नीलत्वादिव्याप्यानुद्भूतत्वाभावकूटमेव मेव । तस्य च संयोगस्याधारणतया चक्षुरादि
व्याप्तेर्विशेषेति । चक्षुष्कादेः सत्त्वाद्गुणेति । कालादावतिव्याप्तेर्ज्ञानकारणेति । इंद्रियावयवसंयोगस्यापि प्रत्यक्षकारणतया इंद्रियावयवेऽतिव्याप्तिवार
णाय मनःसंयोगेति । श्रोत्रं लक्षयति । कर्णेति । घटावच्छिन्ननभसोपि श्रोत्रत्वापत्तेः कर्णशष्कुलीति । नभसः श्रोत्रत्वे विवादादाह । शब्दग्राहकमिति । मनो ल
क्षयति । स्पर्शेति । मनोविभुत्ववादिनां मीमांसकानां मतमादूषयति । अत्र मीमांसका इति । अणुत्वाभावो विभुत्वापि न विभुत्वासिद्धेरित आह । किं ति
ति । निःस्पर्शवत्त्वं गुणादेर्व्यभिचारीति द्रव्यत्वादिति । द्रव्यत्वं घटादेर्व्यभिचारीति विशिष्टहेतुमनुधावति । नन्वेतन्मते मनस्त्वस्यापि निःस्पर्शगुणत्वरूपत्वासंभ
वेन पक्षतावच्छेदकासिद्धिरत आह । मनस्त्वं चेति । आत्मन्यतिव्याप्तिवारणाय सत्यंतं । संयोगाश्रयत्वं कालादावपीति ज्ञानासमवायिकारणेति । च
क्षुर्मनोयोगस्य ज्ञानकारणत्वाज्ज्ञानकारणसंयोगाश्रयत्वं चक्षुरादावतिव्याप्तमिति मनः असमवायीति । ज्ञानासमवायिकारणे चात्ममनःसंयोग ए
वेति नातिव्याप्तिः । केचित्तु नवीनमते दृष्टविशेषाद्धत्रुटेर्मनस्त्वेन पक्षतावच्छेदकस्यैवाभावात् पक्षतावच्छेदकावच्छेदेनानुमितेः । अणोर्विभुत्वस्य बाधे-

त.प्र.

४२

ननु कथं वा तत्र विभुत्वानुमितिरत आह। मनस्त्वं चेति। ज्ञानासमवायिकारणेति पुरुषान्तरीयात्मप्रत्यक्षवारणाय तत्तदात्ममानसत्वावच्छिन्नं प्रति तत्तदात्म
मनःसंयोगत्वेन हेतुतायां मनस्त्वचतुष्टयीनामवच्छेदककोटौ निवेशेन गौरवेण लाघवेनैकमनस्त्वसिद्धिः। न च विजातीयसंयोगत्वेन तस्य हेतुतया न त
त्र मनसो निवेश इति वाच्यं। तथापि समवायेन विजातीयसंयोगस्य विजातीयसंयोगसंबंधेन हेतुः मनसो वा हेतुत्वमिति विनिगमनाविरहादिति
भावइत्याहुः। विभुत्वे मनसो विभुत्वे। संयोगानुपपत्तेरिति। तथा चोपदर्शितानुमानेन पक्षतावच्छेदकासिद्धिर्बाधश्च [illegible] कर्मजः। यथा स्येनक्रियया प
र्णक्रियया श्येनवृक्षसंयोगः। अवयवसंयोगजः। कारणाकारणसंयोगात् कार्याकार्यसंयोगः। यथा हस्ततरुसंयोगात् कायतरुसंयोगः। न च विभोरिति
मूर्तेतरद्रव्यत्वं विभुत्वं। स्पन्दत्वावच्छिन्नं प्रति मूर्तत्वेन कारणतया मूर्तत्वाभावेनात्मनि न कार्योत्पत्तिरिति भावः। अनयोः। आत्ममनसोः। न संयोग
जः। अवयवसंयोगजः। मानाभावादिति। नित्यसंयोगमाह कल्पे सत्त्वादेरभावादनुमानस्य चाप्रयोजकत्वादिति सर्वः। साधकाभावमुक्त्वा बाधकमप्याह।
संयोगत्वावच्छेदेनेति। संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतायां न कार्यतावच्छेदकं जन्यसंयोगत्वमेव नित्यसंयोगाङ्गीकर्त्रा वाच्यं। कार्यमात्रधर्मस्यैव कार्य
तावच्छेदकत्वात्। तथा च तत्र जन्यत्वनिवेशे गौरवमेव तदस्वीकारे प्रतिकूलतर्क इति भावः। ननु समवायेन रूपं प्रति सामानाधिकरण्यसंबंधेनावयवरू
पादीनां हेतुतया कपालगंधादावपि रूपोत्पत्तिवारणाय जन्यसत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वावश्यकतया संयोगत्वावच्छिन्नं प्रति तद्धेतुत्वे मानाभाव
इति न दर्शितगौरवमत आह। अप्रयोजकं चेदमिति। यतः नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वे विरहाद्धा अप्रयोजकं चेदमिति। इदं विभुत्वसाधकमनु
मानमित्यर्थः। अनुकूलतर्काभावादिति भावः। संयोगत्वावच्छेदेनेति। संयोगत्वस्य द्रव्यजन्यत्वव्याप्यत्वेन नित्यसंयोगस्वीकारे तादृशनियमप्रसंगभंगा
दिति भावः। ननु तादृशनियमे मानाभावश्चेत्तत्राप्रयोजकं चेत्सपरं।। नानातर्कविचारणैकनिपुणा नित्यं तर्कैकचिन्तयायातश्चलत्कहृदा विभाव्य सुधि शिवः
यः सारार्थसंग्राहकाः।। इत्येतदधिधारयेयुरपि ज्ञाः संजायते सोऽचिराद्दाढ्यीकृत्य परवादिदूषणाभ्यामाधानेकदक्षः कृती।।१।। ।।इति श्रीमहाराजकुमारमाणिक्य
नीज्ञातितनपदद्वयन्यायपञ्चवागीशश्रीशितिकण्ठशर्मविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां प्रत्यक्षखण्डः समाप्तः।। ।।श्रीसांबशिवोऽर्पयतितरां।। ४२